# শ্রীশ্রীহংসদূতম্

শ্রীশ্রীগুরুগৌরাঙ্গৌ জয়তঃ

Mathura (U.P.)

কবিকুলশিখামণি-শ্রীশ্রীল-রূপগোস্বামি-প্রভুপাদ-প্রণীতম্

# শ্রীশ্রীহংসদূতম্

281001

অকিঞ্চন-

শ্রীমৎ-পুরীদাস-মহাশয়েন

সম্পাদিতম্

ময়মনসিংহ-অলোয়ানিবাসি-

শ্রীশচীনাথরায়-চতুর্ধুরীণেন

প্রকাশিতম্

শ্রীশ্রীগৌরজন্মতিথিঃ

গোবিন্দঃ ২৯, শ্রীগৌরাব্দঃ ৪৫৯ ; চৈত্রঃ ৩, বঙ্গাব্দঃ ১৩৫২ ;

মার্চ্চমাসঃ ১৭, খৃষ্টাব্দঃ ১৯৪৬ ; ফাল্গুনপূর্ণিমা,

রবিবাসরঃ

ঢাকা-নগর্য্যাং 'মঞ্জুষা প্রিণ্টিং ওয়ার্ক্স্' ইত্যাখ্য-যন্ত্রে

শ্রীমদনমোহন-গঙ্গোপাধ্যায়েন মুদ্রিতম্

# কৃতজ্ঞতা-প্রকাশ

শ্রীধাম-বৃন্দাবনবাসী পণ্ডিতপ্রবর শ্রীযুত বনমালিলাল গোস্বামী বিদ্যাভূষণ, শ্রীধাম-নবদ্বীপস্থ-শ্রীহরিবোল-কুটীরের পণ্ডিতবর শ্রীযুত হরিদাসদাস মহাশয়, বরাহনগর শ্রীভাগবতাচার্য্য-প্রভুর শ্রীপাটস্থ শ্রীগৌরাঙ্গ-গ্রন্থ-মন্দির, শ্রীগোপীবল্লভানন্দ দেব-গোস্বামী—শ্রীপাট-গোপী-বল্লভপুর, পুরীর শ্রীগঙ্গামাতা-মঠ, পুরীর বড় ওড়িয়া-মঠ, ঢাকা-বিশ্ববিদ্যালয়, কলিকাতা-বিশ্ববিদ্যালয়, বারাণসীস্থিত বিভিন্ন বিদ্যালয় ও গ্রন্থাগারসমূহ, মাদ্রাজ-বিশ্ববিদ্যালয়, মাদ্রাজ ওরিয়েণ্টেল্ মেনাস্ক্রিপ্ট্স্ লাইব্রেরী, এডেয়ার্ লাইব্রেরী, রাজসাহী-বরেন্দ্র-রিসার্চ্-সোসাইটি, কলিকাতা রয়েল্ এসিয়াটিক্ সোসাইটি, কলিকাতা বঙ্গীয়-সাহিত্য-পরিষদ্, কলিকাতা সংস্কৃত-কলেজ্, পুনা-ভাণ্ডারকর্ ওরিয়েণ্টেল্ রিসার্চ ইন্ষ্টিটিউট্, মুম্বই নির্ণয়সাগর প্রেস্, গোরক্ষপুর গীতা প্রেস্, ওড়িষা প্রভিন্সিয়াল্ মিউজিয়মের হস্তলিখিত পুঁথি-বিভাগ ও অন্যান্য বিভিন্ন প্রতিষ্ঠানের অধ্যক্ষ ও পরিচালকবর্গের সৌজন্যে আমরা শ্রীশ্রীগৌরপার্ষদবৃন্দের গ্রন্থরাজির পাঠ মিলাইয়া সজ্জনবৃন্দের সম্মুখে উপস্থিত করিবার সুযোগ-সৌভাগ্য লাভ করিয়াছি। এইজন্য তত্তৎ-সজ্জনবৃন্দের ও প্রতিষ্ঠানসমূহের শ্রদ্ধাস্পদ পরিচালকবর্গের নিকট সর্ব্বান্তঃকরণে কৃতজ্ঞতা প্রকাশ করিতেছি।

—সম্পাদক

শ্রীশ্রীগুরুগৌরাঙ্গৌ জয়তঃ

# বিজ্ঞপ্তিলেশঃ

স্বয়ংভগবতা শ্রীকৃষ্ণচৈতন্যদেবেন ন্যস্তসমস্তব্রজরসমহানিধেরপ্রাকৃতব্রজরস-রসিককুলশেখরস্য মহাকবেঃ শ্রীমদ্রূপগোস্বামিচরণস্য কৃতিরেতদ্-হংসদূতাখ্যং সংঘাত-কাব্যমপ্রাকৃতবিপ্রলম্ভরসবৈচিত্র্যসমুজ্জ্বলমুজ্জ্বলরসাধিকারিণাং পরমাদরসেব্যং কিমপি হৃদয়ধনং স্বমহিম্না রসসাহিত্যরাজিং সমুল্লাসয়ৎ সমুদ্ভাসতেতরাম্।

কংসবধানন্তরকালং মধুপুর্য্যাং স্থিতিং কুর্ব্বতি ব্রজরামাজীবনানন্দকন্দে শ্রীকৃষ্ণে বল্লভবিরহবিগতপ্রাণ-প্রায়াণাং গোপীনাং কস্যামপি মহত্যাং দশায়াং জাতায়াং বিরহাতিপীড়য়া দশমদশামপ্যধিগতায়াঃ শ্রীরাধায়া অসীমদুঃখাবধিনা সাতিশয়ব্যাকুলিতা শ্রীললিতা নিরুপায়েব শ্রীরাধারমণায় শ্রীরাধাদশাং বিশেষেণ বিজ্ঞাপয়িতুং হংসং কঞ্চিৎ দৌত্যে সনির্বন্ধং সংপ্রার্থ্য সখ্যাঃ স্বস্যাশ্চ নিবেদনীয়ং সর্ব্বমুপদিদেশেত্যেষ কাব্যস্যাস্য বিষয়ঃ। উদ্ধবসন্দেশাদিব গ্রন্থাদস্মাদপি বহবো দৃষ্টান্তা রসশাস্ত্রেষূদাহৃতা ইত্যেতদ্‌গ্রন্থদ্বয়স্য রসাধিকারপ্রামাণ্যে সুষ্ঠু নিদর্শনমিতি কৃতমধিকবচনেন। ভৃশং তৃষ্ণোপশমনী পরমোপাদেয়া শিখরিণীবাপ্রাকৃতবিপ্রলম্ভ-রসবৈচিত্র্যসামগ্রীসংহত্যা শিখরিণীকৃতৈষা রসশিখরিণ্যুজ্জ্বলভক্তিরসতৃষাতুরাণাং শান্তিং বিতনোতি নিতরাম্।

অস্মিন্নুপান্ত্যশ্লোকে 'শ্রীমান্ জয়তি বিদিতঃ সাকরতয়া' ইতি বাক্যেন গ্রন্থকৃদগ্রজানাং শ্রীমৎসনাতনগোস্বামিপাদানামুদ্দেশঃ শ্রীভগবতঃ শ্রীকৃষ্ণচৈতন্য-দেবস্য শ্রীচরণাশ্রয়ণাৎ প্রাগেব গ্রন্থস্য রচনাকালং স্ফুটং সূচয়তি।

মুদ্রিতচরগ্রন্থত্রয়ং করলিপিষট্‌কঞ্চ পর্য্যালোচ্য বিশোধ্য মুদ্রিতঃ প্রকাশিত-শ্চায়ং গ্রন্থঃ সজ্জনানন্দবর্দ্ধনো ভবতুতরামিতি

অকিঞ্চনস্য

শ্রীপুরীদাসস্য

শ্রীশ্রীগুরুগৌরাঙ্গৌ জয়তঃ

# হংসদূতস্য শ্লোক-সূচী

[ মাতৃকাক্রমেণ প্রতিচরণগতাদ্যাদ্যক্ষরাণাং নির্দ্দেশিকা ]

( অঙ্কপর্য্যায়ঃ শ্লোক-পৃষ্ঠয়োরিতি জ্ঞাতব্যম্ । )


## অ

অকস্মাদস্মাকং ১৬।২
অকাণ্ডে যদ্ভূয়ঃ ১০৭।৮
অকার্যীদাকর্ষ- ১০১।৭
অগাধায়াং বাধাময়- ২।১
অগাধা রাধায়ামপি ১২৩।৯
অতঃ শঙ্কে ৩৮।৩
অতিক্রান্তে সম্প্রত্য- ৯৪।৭
অতীতেয়ং বার্ত্তা ১১২।৮
অতোঽহং দুঃখার্ত্তা ৯।১
অথ ক্রামং ক্রামং ৪১।৩
অদূরাদাসীনো ৫০।৪
অধস্তাদ্ধাবন্তো ১১।২
অনৌচিত্যং তস্য ১০৬।৮
অপাঙ্গেন স্পৃষ্টা ১২১।৯
অপূর্ব্বা যস্যান্ত- ১৪০।১০
অভূৎ কোঽপি ৯৮।৭
অমন্দং পূর্ণেন্দু- ৪৮।৪
অমন্দঃ কালিন্দী- ১২৪।৯
অমন্দাদাত্মানং ৮৫।৬
অমন্দাদাশঙ্কে ৩৬।৩
অমর্ষাৎ প্রেমের্ষ্যাং ৮।১
অমর্ষাদ্ধাবন্তীং ১০৮।৮
অমী কুঞ্জাঃ ১০০।৭
অমী ব্যোমীভূতা ৬৯।৫
অমুঞ্চন্তী সঙ্গং ৯৫।৭
অয়ং পূর্ব্বো রঙ্গঃ ৭৩।৬
অয়ং লীলাপাঙ্গ- ৩৭।৩
অয়ি শ্রীগোবিন্দ- ৩৫।৩
অয়ি স্বপ্নো দূরে ১০৭।৮
অয়ে কুঞ্জদ্রোণী- ৭৪।৬
অয়ে রাসক্রীড়া- ৯৬।৭
অরাতিং জ্ঞাতীনাং ২২।২
অরিষ্টেনাহূতাঃ ৬৯।৫
অলব্ধং কালিন্দী- ৪৩।৪
অলিন্দাগ্রে ৩৬।৩
অলিন্দে কালিন্দী- ১১৫।৮
অলিন্দে যস্যান্তে ৪৭।৪
অলীকামর্ষেণ ১১০।৮
অবশ্যং কালিন্দী- ২৩।২
অবষ্টভ্যস্তম্ভা- ৩৩।৩
অবস্থা তস্যার ৩।১
অবিশ্রদ্ধা মা ১০৭।৮
অবোধিষ্ঠাঃ ৩৫।৩
অশক্ত্যাং গন্তব্যে ১০৯।৮
অসব্যং বিভ্রাণা ৩৬।৩
অহর্বৃন্দং বৃন্দাবন- ৭৫।৬
অহো কষ্টং বাল্যা- ১১৪।৮

## ই

ইতি কংসারেঃ ১১৮।৯
ইতি ক্রান্তা ৩২।৩
ইতি দ্বৈধং নান্তঃ ১৩৯।১০
ইতি প্রেমোদ্গাঢ়- ১৩৮।১০
ইতি প্রেমোদ্গার- ১২৭।৯
ইতি প্রেমোন্মীলদ্- ১১৩।৮
ইতি ব্যক্তং ৮৭।৬
ইতি ব্যগ্রৈরস্যাং ৮০।৬
ইতি ব্যাজাদেনাং ১১৭।৮
ইতি ব্রূতে যস্যাং ৪৪।৪
ইতি শ্রুত্বা ৮৭।৬
ইতি স্বৈরং যস্যাং ৩৯।৩
ইতীবাস্যা ৭৬।৬
ইদং কিংবা হন্ত ১২০।৯
ইদং সোঢ়ুং ১০৫।৮
ইদানীং পশ্চাত্তে ১০০।৭
ইদানীং মারী ১৩৪।১০
ইদানীমাপেদে ৮৬।৬
ইয়ং তে দুর্ব্বোধা ১৩৩।১০
ইয়ং নাথ ! ক্রূরা ১৩৩।১০
ইয়ং বন্দে মূর্দ্ধ্না- ১০৪।৮
ইয়ং যামৈর্গম্যা ১৩৯।১০
ইয়ং সা বাসন্তী ৬৭।৫
ইহায়াতো ধূর্ত্তঃ ১০৬।৮
ইহায়াতো বৃন্দা- ১০৫।৮

## উ

উৎসর্পন্তঃ স্মরণসরণীং ১০৮।৮
উদঞ্চৎকালিন্দী- ৪৯।৪
উদঞ্চন্নেত্রান্তঃ- ২৯।৩
উপাসীনো দৃগ্ভ্যাং ১৩৮।১০
উরো যস্য স্ফারং ৫৯।৫

## ক

কচাকৃষ্টি-ক্রীড়াক্রম- ১১০।৮
কথং ন ত্বং ১৩৫।১০
কথং নায়াসীতি ৯৯।৭
কথং বা কল্যাণং ১২৩।৯
কথং বা তে ১২৬।৯
কথঙ্কারং যুক্তো ১৪০।১০

কথামাচক্ষীথা ১২৭।৯
কদম্বঃ কাদম্ব ! ১৬।২
কদম্বানাং বাটী ২৪।২
-কদম্বাহঙ্কারং ৫৬।৪
কদা কুঞ্জে গোপী ১১৭।৮
কদা কুঞ্জে লীনা ১১৬।৮
কদাচিৎ কল্যাণী ৯৭।৭
কদাচিৎ খেদাগ্নিং ৩।১
কদাচিদ্বাসন্তী- ১১১।৮
কদাচিন্মূঢ়েয়ং ৮৫।৬
কদা প্রেমোদ্দণ্ড- ১০৩।৮
কদা প্রেমোন্মীলন্- ১০২।৭
কদাহং সেবিষ্যে ১১৫।৮
কপোলান্তে ৪৯।৪
করিষ্যত্যানন্দং ২১।২
করিষ্যে গোবিন্দং ১০৩।৮
কলাবান্ সানন্দং ১০।২
কিমস্মানেতস্মান্- ৩৭।৩
কিমাবিষ্টা ভূতৈঃ ৮০।৬
কিমাহো রাধেতি ৭৩।৬
কিমেনামেণাক্ষীং ১১৯।৯
কিমেভির্ব্যাহারৈঃ ৬২।৫
কিরন্তী লাবণ্যং ১৭।২
কিশোরোত্তংসোঽসৌ ১২।২
কুহূকণ্ঠৈরণ্ডাবধি ৭২।৫
কৃতস্তোত্রা মুগ্ধে- ৪৫।৪
কৃতাকৃষ্টিক্রীড়ং ৭৭।৬
কৃতাসঙ্গো ভাবী ৫২।৪
কৃতোদ্বেগঃ ৮৯।৭
-ক্রিয়ে জাতে ১৯।২
ক্বচিৎ ক্রৌঞ্চারাতেঃ ৩৪।৩
ক্ষণং যানালোক্য ৫৪।৪
ক্ষণং হৃষ্টস্তিষ্ঠন্নিবিড়- ১৪।২
ক্ষতাপস্মারেণ ৮০।৬

খ

খরায়স্তে সন্ধ্যো ১৩৪।১০

গ

গতঃ কালো যস্মিন্ ৭১।৫
-গভীরান্তঃকক্ষাধৃত- ৫৭।৫
গরীয়ান্ মে ৯৯।৭
গলদ্বাষ্পাসার- ১৩।২
গুণো যশ্চাণূর- ২০।২
গুরোঃ শিষ্যো নূনং ৫১।৪
গুরোরন্তেবাসী ৯২।৭
গৃহীত্বা গোবিন্দং ১২৬।৯
গৃহীত্বা বিভ্রশ্যন্- ১২০।৯
গ্রহীতুং ত্বাং ১২৮।৯

ঘ

ঘনশ্যামা ভ্রাম্যত্যুপরি ৪৫।৪
ঘনীভূতং চূতৈ- ৩২।৩

চ

চতুঃশালং শৌরেঃ ১৯।২
চলন্মুক্তালম্ব- ৪৬।৪
চিরং কংসারাতে- ১১৯।৯
চিরং কোঽপি ১৪১।১০
চিরং ধ্যানাসক্তা ১৩৬।১০
চিরং বিস্মৃত্যাস্মান্ ১০।২
চিরং শুষ্কং ২৫।২
চিরাদন্তর্ভূতা ১৩১।৯
চিরাদস্যাশ্চিত্তং ৩।১
চিরাদার্ত্তা ৮১।৬
চিরাদূধোভারা- ৬৬।৫
চিরান্মৃগ্যন্তীনাং ৪৩।৪

ছ

ছদদ্বন্দ্বে যস্য ৫২।৪

জ

জগন্নেত্রশ্রেণী- ৮১।৬
জগৌ চিত্রং ১৭।২
জনান্ সিদ্ধাদেশান্ ৮২।৬
জবাপুষ্পশ্রেণী- ৩।১
জিতং তর্হি স্বৈরং ৪৫।৪
জিহীতে সাম্রাজ্যং ৬১।৫
জিহীথা বিখ্যাতাং ২৮।৩

ত

ততঃ সম্ভাষেথাঃ ১২১।৯
ততস্তাং ন্যস্তাঙ্গী- ৫।১
ততো গোবিন্দস্য ১৩৮।১০
ততো মধ্যেকক্ষং ৪৬।৪
ততো রাধাং নীরা- ৬।১
ততোঽহং ধম্মিল্লে ১১০।৮
ততো হংসা- ২৭।৩
তথাপি ত্বাং ১২৫।৯
তথাপি স্ত্রীপ্রজ্ঞা ৫৩।৪
তথাপ্যস্যাং হংহো ১৩৬।১০
তথাস্যা রাধায়া ৮৫।৬
তথেদানীং হা ধিক্ ৯৮।৭
তদন্তে বাসন্তী- ১৯।২
তদন্তে শ্রীকান্ত- ২৪।২
তদাখ্যামি স্বামিন্ ! ৯৭।৭
তদা নাস্মান্ ৬৩।৫
তদা নিস্পন্দাঙ্গী ৪।১
তদামাক্ষী- ২।১
তদারণ্যং ঘোরং * পরি।১০
তদারম্ভাদ্গোপী- ১১৪।৮
তদালোক- ৭।১
তদালোকাদ্ধীর ! ৪৫।৪
তদালোকোদ্ভেদ- ১৯।২
তদীয়ো ব্যাপারস্তব ১৩১।৯
তদুত্তিষ্ঠ ব্রীড়াবতি ! ১১২।৮
তদেতৎ সন্দেশং ১০।২
তদেতৎ কিং ১২৯।৯
তদেবাস্তাং তাবদ্- পরি।১০
তদৈবাস্মাকীনাং ৬৪।৫
তনূভূতং সত্ত্ব- ৮৯।৭
তমাদৌ পন্থানং ১৫।২
তমালশ্যামাঙ্গী ১৭।২


* পরি—পরিশিষ্টম্।

| | |
|---|---|
| তমালশ্যামাঙ্গো | ১।১ |
| তমালস্যালোকাদ্- | ২৩।২ |
| তমেবাদ্রিং | ২২।২ |
| ত্বয়া গন্তব্যা | ১২।২ |
| ত্বয়া ভূয়ঃ ক্রীড়া- | ১৮।২ |
| তরঙ্গৈঃ কুর্ব্বাণা | ৭৬।৬ |
| তব ধ্বানাত্তাসাং | ২৬।৩ |
| তব শ্রান্তস্যান্তঃ- | ১৬।২ |
| তব স্কন্ধোপান্তে | ১১৬।৮ |
| তবাক্ষোরানন্দং | ৪০।৩ |
| তবাপাঙ্গ-ক্রীড়া- | ৩৯।৩ |
| তবাভ্যর্ণং ভেজে | ১২৯।৯ |
| তবেয়ং ন ব্যর্থা | ২০।২ |
| তিরোধায় স্বাঙ্গং | ১২৯।৯ |
| তুলাকোটিক্বাণৈ- | ১০৮।৮ |
| তৃণাবর্ত্তাক্রান্ত্যা | ৬৯।৫ |
| তৃণাবর্ত্তারাতে- | ৩১।৩ |
| ত্রিলোকীলক্ষ্মীণাং | ৪৮।৪ |
| ত্রিবক্রাহো | ৭৯।৬ |
| ত্বদীক্ষাদীক্ষায়ৈ | ৮২।৬ |
| ত্বদুৎসঙ্গে নিদ্রা- | ১১৫।৮ |
| ত্বমষ্টাভির্নে ত্রৈ- | ২৮।৩ |
| ত্বমাবেশ্য ক্লিশ্যন্- | ১৩৮।১০ |
| ত্বমাসন্নঃ কঞ্চিন্নিহ | ১৩৭।১০ |
| ত্বমাসাদ্য স্বৈরং | ১০৬।৮ |
| ত্বমাসীনঃ শাখা- | ২৭।৩ |
| ত্বমাসীনস্তস্যাং | ২৪।২ |
| ত্বমেকা শুদ্ধাক্ষি ! | ৩৭।৩ |
| ত্বয়া ক্রোড়ীচক্রে | ১৩০।৯ |
| ত্বয়া গোষ্ঠং | ৭৫।৬ |
| ত্বয়া নাগন্তব্যং | ৭০।৫ |
| ত্বয়া পুণ্যে | ৩০।৩ |
| ত্বয়া ভূয়ো যস্যাঃ | ৬৬।৫ |
| ত্বয়া মাকন্দস্য | ৬৭।৫ |
| ত্বয়া বিজ্ঞাতব্যা | ১৩।২ |
| ত্বয়া বিজ্ঞাতব্যো | ৬২।৫ |
| ত্বয়া বৃন্দাদেব্যাঃ | ৩১।৩ |
| ত্বয়া সন্তাপানামুপরি | ৮৬।৬ |
| **দ** | |
| দদর্শাগ্রে কঞ্চিন্মধুর- | ৬।১ |
| দধানা সাধীয়ঃ | ১৭।২ |
| দধানে দৃগ্‌ভঙ্গ্যা | ৯০।৭ |
| দধীথা ভাণ্ডীরে | ২৭।৩ |
| দশামস্যাঃ শংসন্ | ৯২।৭ |
| দিধীর্ষন্ মাং | ১০৮।৮ |
| দিধীর্ষৌ জাতের্ষ্যং | ১১১।৮ |
| দুকূলং বিভ্রাণো | ১।১ |
| দুরালোকং | ৭৫।৬ |
| দৃগন্তোগন্তীরী- | ৪।১ |
| দ্যুতিং ধত্তে যস্য | ৫৮।৫ |
| -দ্যুতীনাং লাবণ্যং | ৫৩।৪ |
| দ্রুমালীয়ং চেতঃ | ১০০।৭ |
| **ধ** | |
| ধরণ্যামুন্মীল- | ৮৪।৬ |
| ধুরীণো ধীরাণামধি- | ১৪১।১০ |
| ধৃতানন্দাং বৃন্দাবন- | ১১৬।৮ |
| ধৃতোৎকণ্ঠা | ৭।১ |
| ধৃতো যো গান্দিন্যা | ৬১।৫ |
| ধ্রুবং পুণ্যভ্রংশাদ- | ৭৯।৬ |
| ধ্রুবং সা চক্রাঙ্কী | ১৩।২ |
| **ন** | |
| ন কস্মিন্ বিশ্রম্ভং | ৮।১ |
| ন জানীমঃ | ৯১।৭ |
| ন জানে কুত্রায়ং | ১১১।৮ |
| নটদ্‌ভ্রুবল্লীকং | ৬১।৫ |
| ন তস্যা দোষোঽয়ং | ৮।১ |
| নদীং কাঞ্চিদ্গোষ্ঠে | ৭৬।৬ |
| ন ধৎসে রাধায়া | ১২৫।৯ |
| ন নির্বক্তুং | ৫৩।৪ |
| ন পারং নাবারং | ১০৪।৮ |
| ন ভিক্ষা সংপক্ষে | ৯।১ |
| ন যস্মাদ্‌দুর্মেধা | ৭৮।৬ |
| ন রাগং সর্ব্বজ্ঞ ! | ১৩৬।১০ |
| ন লেভে লুব্ধাপি | ১১৪।৮ |
| ন বংশীমজ্ঞাসীদ্- | ১০৮।৮ |
| নবাশোকোত্তংস- | ৩৭।৩ |
| নবীনস্ত্বং কম্বো ! | ১২৫।৯ |
| নবীনেয়ং সম্প্রত্য- | ৮১।৬ |
| নিকৃন্তন্ নেত্রান্ত- | ১৩৭।১০ |
| নিকেতৈরাকীর্ণা | ৩৩।৩ |
| নিজাঙ্গে কাদম্বী- | ১১৮।৯ |
| নিতম্বিন্যো | ২৬।৩ |
| নিদানং গাম্ভীর্য্য- | ৫৭।৫ |
| নিধায়াগ্রে | ৪৮।৪ |
| নিধায়াঙ্কে | ৬।১ |
| নিধাস্যন্তী কণ্ঠে | ৮৪।৬ |
| নিরস্তপ্রত্যূহং | ১১।২ |
| নিরাতঙ্কস্তস্যাঃ | ৪৭।৪ |
| নিরানন্দা গাব- | ১৩৪।১০ |
| নিবাসস্তে দেবি ! | ১২২।৯ |
| নিবাসান্ বৃষ্ণীনামনু- | ৪১।৩ |
| নিবিষ্টঃ পল্যঙ্কে | ৪৮।৪ |
| নিবিষ্টা কালিন্দী- | ৩৩।৩ |
| নিবেশ্য প্রত্যেকং | ১১৮।৯ |
| **প** | |
| পতঙ্গীবাত্মানং | ৭৭।৬ |
| পতাকাভিঃ | ৪১।৩ |
| পদব্যা ভব্যানাং | ১২।২ |
| পয়োরাশিস্ফীত- | ৯০।৭ |
| পরাং ধর্ম্মাপেক্ষা- | ৯৮।৭ |
| পরাচীনো জন্মাবধি | ১৪১।১০ |
| পরানন্দাভোগঃ | ১।১ |
| পরানন্দো যস্মিন্- | ৬২।৫ |
| পরামৃশ্যে যস্মাদ্ধৃতি- | ১০৪।৮ |
| পরাবর্ত্তিষ্যন্তে | ২৬।৩ |
| পরাবৃত্তশ্বাসা- | ৫।১ |
| পরিক্লেশ-ম্লেচ্ছান্ | ১৩৭।১০ |
| পরিধ্বস্তামোদাং | ৯৩।৭ |

| | |
|---|---|
| পরীণাহাৎ প্রেম্ণা- | ৪।১ |
| পরীতাং ভূয়স্তা | ৯৩।৭ |
| পরীতাঙ্গী গোবর্দ্ধন- | ১২০।৯ |
| -পরীপাকস্থান্ত- | ৬১।৫ |
| পরীরম্ভং প্রেম্ণা | ১২৩।৯ |
| পরীবারান্ | ১২৭।৯ |
| পরীহাসারম্ভী | ১০৯।৮ |
| পরোক্ষং বক্ষ্যন্তে | ৭৪।৬ |
| পরোক্ষং বৃষ্ণীনাং | ১২২।৯ |
| পলাশৈঃ কালিন্দী- | ৫।১ |
| পবিত্রেষু প্রায়ো | ৯।১ |
| পশূনাং পাতারং | ৮৩।৬ |
| পিকানাং বেবেষ্টি | ৬৪।৫ |
| পিবন্ জম্বুগ্রামং | ১৪।২ |
| পুনঃ কোপোদ্ভিন্ন- | ১২৭।৯ |
| পুরস্তস্মিন্নীপ- | ৩০।৩ |
| পুরস্তাদাভীরীগণ- | ৫০।৪ |
| পুরস্তীরে তীরে | ১১৭।৮ |
| পুরা তিষ্ঠন্ | ৬৫।৫ |
| পুরা বদ্ধা | ৯৬।৭ |
| পুরী যস্মিন্নাস্তে | ৩২।৩ |
| পুলিন্দ্যো গোবিন্দ- | ২৩।২ |
| প্রণম্য শ্রীপাদাম্বুজ- | ৬৫।৫ |
| প্রণামং শংসন্তী | ৭।১ |
| প্রণেতব্যো | ৩১।৩ |
| প্রণেতব্যো দৃষ্টে- | ১৩৯।১০ |
| প্রণেষ্যেতে বাল- | ৫১।৪ |
| প্রতীকারারম্ভ- | ৯৫।৭ |
| প্রতীক্ষেথা ভ্রাত- | ৪৭।৪ |
| প্রপন্নঃ কালোঽয়ং | ১৩৫।১০ |
| প্রপন্নঃ প্রেমাণং | ১৪১।১০ |
| প্রপেদে চুম্বায় | ১০৯।৮ |
| প্রপেদে ভগ্নেদং | ১৩২।৯ |
| প্রবন্ধোঽয়ং বন্ধো- | ১৪২।১০ |
| -প্রভাজৈত্রং | ৬০।৫ |
| প্রভোরন্তঃ সান্দ্রাং | ১৪২।১০ |
| প্রভৌ মুক্তাপেক্ষে | ১০০।৭ |
| প্রমোদং নালীকে | ৯।১ |
| প্রযত্নাত্ত্বামেব | ১২২।৯ |
| প্রযত্নাদাবাল্যং | ৬৬।৫ |
| প্রয়াতাহং মুগ্ধে ! | ৩৬।৩ |
| প্রযাতু স্বচ্ছন্দং | ১০৫।৮ |
| প্রযাতো মাং | ১০৫।৮ |
| -প্রযুক্তো যদ্ভূয়ঃ | ১৩১।৯ |
| প্রবিষ্টং মংস্যন্তে | ২৮।৩ |
| প্রবীণা গোপীনাং | ৭৪।৬ |
| প্রবৃত্তা তন্মূর্ত্তি- | ৫৩।৪ |
| প্রবৃত্তা হংসায় | ৮।১ |
| প্রবেশস্তত্রাসীৎ | ৭৯।৬ |
| -প্রবেশে নারীণাং | ৩৯।৩ |
| প্রসূতো দেবক্যা | ৬৮।৫ |
| প্রসূনানাং গন্ধং | ৭০।৫ |
| **ব** | |
| বধানৈনং ধূর্ত্তং | ১১৩।৮ |
| বলাদস্থ প্রাণা- | ৯৫।৭ |
| বলাদস্যাস্তেন | ৯১।৭ |
| বলাদাকর্ষন্তং | ১০২।৭ |
| বলাদাক্রন্দন্তী | ১৫।২ |
| ব্রুবাণঃ কুর্ব্বীথাঃ | ১২৩।৯ |
| **ভ** | |
| ভজন্ সত্যো | ৭০।৫ |
| ভজে লজ্জাং | ৯৮।৭ |
| -ভরাণাং ধারাভি- | ৩২।৩ |
| ভবত্যাং কর্ত্তব্যঃ | ১২১।৯ |
| ভবন্তং কংসারে ! | ৮৩।৬ |
| ভবন্তং বীক্ষন্তাং | ১১।২ |
| ভবন্তং সন্তপ্তা | ৮৩।৬ |
| ভবান্ ক্ষিপ্রং | ১০।২ |
| ভবান্ দ্রষ্টা | ৪৬।৪ |
| ভবান্ যস্যাং | ৬৫।৫ |
| ভবান্ ব্যগ্রস্তস্থৌ | ৭১।৫ |
| ভবেদন্যঃ কো বা | ৯২।৭ |
| ভিয়া সম্ভ্রান্তাক্ষং | ১২০।৯ |
| ভুজদ্বন্দ্বং যস্য | ৬০।৫ |
| ভুজস্তম্ভোল্লাসাদ্- | ১১২।৮ |
| -ভ্রমাক্রান্তস্বান্তো | ২৫।২ |
| **ম** | |
| মণিস্তম্ভালম্বী | ৫০।৪ |
| মদাদুদ্দামানাং | ৫৬।৪ |
| মদালোকোল্লাসি- | ৪৩।৪ |
| মনীষা হি | ৮২।৬ |
| মনো মে হা | ১০৪।৮ |
| মনোবাদ্যে নাট্যং | ১৩২।৯ |
| মম স্যাদর্থানাং | ২০।২ |
| ময়া প্রষ্টব্যোঽসি | ৭৩।৬ |
| ময়া বাচ্যঃ কিংবা | ৭৮।৬ |
| মরালা মাণিক্য- | ৪২।৪ |
| মরীচিভির্যস্মিন্ | ৫৯।৫ |
| মহামীনং ক্ষিপ্রং | ১২৮।৯ |
| মহীচক্রে শঙ্কেমহি | ২২।২ |
| মিলদ্ভৃঙ্গীং | ১১৯।৯ |
| মিলন্তং কালিন্দী- | ৬।১ |
| -মিষাদগ্রে গোপী- | ৬৭।৫ |
| মুকুন্দ ! ভ্রান্তাক্ষী | ৯৭।৭ |
| মুকুন্দ ! শ্রীবৃন্দাবন- | ৮৮।৭ |
| মুকুন্দস্তে সাক্ষাৎ | ৪৯।৪ |
| মুকুন্দো গান্দিন্যা- | ২।১ |
| মুখদ্বারা বারদ্বয়- | ৫৮।৫ |
| মুদা ক্ষেমং | ১১৯।৯ |
| -মুরারাতেঃ ক্রীড়াবলি- | ১৪২।১০ |
| মুরারাতের্যত্র | ৪১।৩ |
| মুরারে ! কালিন্দী- | ৮৮।৭ |
| মুরারে ! দুঃসাধা | ৮৫।৬ |
| মুরারে ! বিজ্ঞপ্তিং | ৭৬।৬ |
| মুহুঃ কূজৎকাঞ্চী- | ১২৪।৯ |
| মুহুঃ শূন্যাং | ৩৮।৩ |
| মুহুঃ সিক্তস্তম্বাং | ২৮।৩ |
| মুহুর্দ্বেষ্টি দ্রোহং | ১৩৬।১০ |
| মুহুর্ভ্রাম্যচ্ছিল্লী- | ১০২।৭ |

মুহুর্মানগ্রন্থিং ১১৪।৮
মুহুর্লাস্তক্রীড়া- ৩০।৩
মুহুস্তত্রাভীরী- ৪০।৩
মৃণালীভুর্জাভো ১৪।২

**য**

যতঃ কল্পস্থাদৌ ৫৭।৫
যতঃ সা সৈরিন্ধ্রী ১৩০।৯
যতো জাতঃ ১৩১।১০
যথার্থং স্বং ২২।২
যদর্থং দুঃখাগ্নি- ৭৮।৬
যদস্যাং কাঠিন্যং ১৩৩।১০
যদাত্মানং দর্পাদ্- ১৩২।৯
যদাভীরীবৃন্দৈ- ৪৪।৪
যদা যাতো গোপী- ২।১
যদারোঢ়ুং দূরা- ২৫।২
যদালানস্তম্ভ- ৫৬।৪
যদা বৃন্দারণ্য- ৬৪।৫
যদাস্থায়ি ভ্রাত- পরি।১০
যদুৎসঙ্গে তুঙ্গ- ৪২।৪
যদেতস্মিন্ বেণো- ১২৬।৯
যদেতস্যা নাসা- ৯৬।৭
যদেষাং প্রাণান্তং ৫৫।৪
যদেষা কংসারে ! ৮৬।৬
যমারূঢ়ো গূঢ়- ১৬।২
যয়া নিন্যে তূর্ণং ১২।২
যযৌ কালঃ ১০১।৭
যযৌ মন্দা ৭৮।৬
যযৌ রাগাঢ্যানাং ৫৫।৪
যযৌ রাধা ৭৪।৬
যশোদা যস্যান্তঃ ৫৮।৫

**র**

রণদ্ভৃঙ্গশ্রেণী- ১০৩।৮
-রবালম্বী ভ্রাম্যদ্- ১২৪।৯
রসাদাখ্যাতব্যং ৭৩।৬
রসানামাধারৈ- ১৪২।১০
-রহঃক্রীড়াসাক্ষী ২১।২
রুচিস্মেরা যা ১২১।৯
রুচীনামুল্লাসৈ- ৫৬।৪
রুবন্ যাহি ২৬।৩

**ল**

লতালীভিঃ পুষ্প- ১০৯।৮
লতাশ্রেণী ৭০।৫
লসদ্ভিত্তিপ্রান্তং ৪৬।৪

**ব**

বনান্তে চান্দ্রীভিঃ ১০৩।৮
-বপুর্বল্লীভ্রশ্যন্- ১৮।২
বভূব প্রষ্ঠৌহী ৬৬।৫
বভূব ব্যর্থা ২৪।২
বয়ং গ্রাম্যা ৭১।৫
বয়ং ত্যক্তাঃ স্বামিন্ ! ৭২।৫
বয়স্যস্তে গোবর্দ্ধন- ১০৭।৮
বয়স্যস্তে সোঽয়ং ১১২।৮
বরং দূতং ৭।১
বরাকীয়ং দৃষ্ট্বা ১২৯।৯
বসন্তীং বাসন্তী- ১১৫।৮
বসানঃ কৌষেয়ং ৪৯।৪
বহন্তে নস্তাপং ৬৯।৫
বহন্তে বা বাতাঃ ৬৪।৫
বহন্তে হি ১২৫।৯
বিকদ্রুঃ পৌরাণী- ৫০।৪
বিকাশেন ভ্রষ্টৈঃ ৩০।৩
বিজানীষে ভাবং ৯১।৭
বিতন্বানং তন্বী- ৫৯।৫
বিতন্বানঃ কান্তিং ১৩৫।১০
-বিদগ্ধ ! ব্যামুগ্ধং ৬৩।৫
বিদূয়ন্তে যত্র ১৩।২
বিদূরাদাভীরী- ১৫।২
বিদূরাদাহর্ত্তুং ১১৭।৮
বিদূরে যৎ ১৩২।৯
বিধত্তে তদ্বক্তুং ৯৭।৭
বিধত্তে শুশ্রূষা- ৮২।৬
বিধাতব্যো ১৮।২
বিধেয়া গোপীনাং ১৩৯।১০
বিধো ! পাদস্পর্শাদপি ৯৩।৭
বিনীত-প্রহ্লাদ- ১৩১।৯
বিপত্তিভ্যঃ ৯৪।৭
বিমুক্তামজ্জাসীঃ ৩৫।৩
বিমুক্তায়া ব্যক্ত- ৯৫।৭
বিরাজন্তী সর্ব্বোপরি ১৫।২
বিরাজন্তে যস্য ৫৪।৪
বিরাধত্বং ঘোষো ১৩৪।১০
বিরিঞ্চেরস্মিন্ ৩৪।৩
বিলজ্জং মা ৩৯।৩
বিলম্বঃ কাদম্বী- ১৪০।১০
বিলাসার্থী ১০১।৭
বিলাসিন্যপি ১৩৫।১০
বিলাসোল্লাসেন ১১৬।৮
বিলিখ্য ভ্রূভঙ্গী- ৮৪।৬
বিলীঢ়ে শল্লক্যা ৩৪।৩
বিলীনা ধূলী- ৪।১
বিলোকিষ্যে ১০২।৭
বিলোকেথাঃ ২০।২
বিলোকেথাঃ কৃষ্ণং ৬৩।৫
বিবেকাখ্যং ছিত্ত্বা ১২৮।৯
বিবেক্তুং শক্যেতে ১৪০।১০
বিশীর্ণাঙ্গীমন্তর্ব্রণ- ৯৩।৭
বিষাদং মা ৪৪।৪
বিসৃজ্যন্তে সন্তঃ ৭২।৫
বিহঙ্গেন্দ্রো যুগ্মীকৃত- ৫২।৪
বৃষঃ শস্তোর্যস্যাং ৩৯।৩
ব্যাদশন্তে সামস্বর- ৫২।৪
ব্রজানন্দিন্নন্দীশ্বর- ৮৮।৭

**শ**

শনৈস্তাসাং তাপং ২৩।২
শয্যালুর্যাং রাত্রৌ ৪৭।৪
শরন্মেঘশ্রেণী- ২৫।২
শিনীনামুত্তংসঃ ৫৯।৪

শৃণোষি প্রত্যক্ষং ৩৮।৩
-শ্রবাদভ্রষ্টায়াং ৮০।৬

### স

স কিং সাক্ষাদ্- ১২৪।৯
সকৃদ্দৃষ্ট্বা দূরাদহিত- ৭৭।৬
সকৃদ্বংশীনাদ- ২১।২
সখি ! স্বপ্নারম্ভে ১০৬।৮
সখী কালিন্দীয়ং ৯২।৭
সখী তস্যা ৬৫।৫
সখীনামাক্রন্দং ১১৩।৮
সখীসন্দোহানাং ৫।১
সখে ! দামশ্রেণী- ৫৮।৫
সখে ! নিঃসন্দেহং ৬২।৫
সখে ! যস্যাভীরী- ৫৭।৫
সখে ! সাক্ষাদ্দামোদর- ৪০।৩
স চেন্মুক্তাপেক্ষ- ৯৬।৭
স জাতো গোপাল- ৬৮।৫
স জানুভ্যামষ্টা- ৫১।৪
সতীতি খ্যাতিং ৩৫।৩
সতীনাং মূর্দ্ধন্যা ৮৬।৬
সদা কংসারাতে ! ভজসি ৮৭।৬
সদা কংসারাতে ! স্ফুরতি ১৩০।৯
সদা খদ্যোতাভাং ৫৯।৫
সদাভীরী- ৩১।৩
সদাভ্যর্ণে ৮৩।৬
সদেতি ক্রন্দন্তী ৮৮।৭
স দেবর্ষিমুর্ক্তানপি ৫৪।৪
স ধেনূনাং ২১।২
সমক্ষং সর্ব্বেষাং ৮৭।৬
সমন্তাদধ্যাত্মং ৯১।৭
সমন্তাদানন্দং ৩৩।৩
সমন্তাদুত্তপ্তস্তব ৮৯।৭
সমন্তাদুন্মীলদ্- ৬০।৫
সমন্তাদুল্লাসস্তব ১৮।২
সমন্তাদেবাস্তং ৬৮।৫
সমর্য্যাদা যেষাং ৪২।৪
স মাং ধৃত্বা ১০১।৭
সমাগন্তা রাধে ! ৪৪।৪
সমাসাদ্য স্বৈরং ৭৯।৬
সমীপে নীপানাং ৬৭।৫
সমুত্তিষ্ঠ ক্ষিপ্রং ১১।২
স যাত্যুচ্চৈঃ ১১৮।৯
স যূনামুত্তংস- ৩৮।৩
সরোজানাং ব্যূহঃ ৫৫।৪
স বর্দ্ধিষ্ণুং ২৭।৩
সহালীভির্লেভে ৩।১
সুখেন প্রস্থানং ১৪।২
সুখেন শ্রীবৃন্দাবন- ১২৬।৯
সুধাপূর্ণং চেতঃ ৬৩।৫
সুহৃদ্বুদ্ধ্যা ৪২।৪
-স্খলৎপাদন্যাস- ২৯।৩
-স্পৃহাক্ষিপ্তা ২৯।৩
-স্পৃহাধীনা শৌরে ! ৯৪।৭
স্ফুটং ক্রোড়াকারে ১৩০।৯
-স্ফুরৎ-প্রেমানন্দ- ৪০।৩
স্ফুরন্তং বীক্ষিষ্যে ৪৩।৪
স্ফুরন্মুক্তাপঙ্‌ক্তি- ৬১।৫
স্মরক্রীড়াসিন্ধুঃ ১১২।৮
স্মরক্লাম্যদ্গোপী- ৬০।৫
স্মরোদ্বর্দ্ধিক্রীড়ং ৮৩।৬
স্মরো হন্তুং ৯০।৭
স্বকীয়াগারং পরি।১০
স্বদেশং কুর্ব্বীথাঃ ১৩৭।১০
স্বয়ম্ভূচূড়াগ্রে- ৫৪।৪

### হ

হঠাদদ্য শ্বো বা ৮৯।৭
হতাশা নিঃশঙ্কং ৯৪।৭
হতাশেয়ং কিংবা ১২৮।৯
হতা সেয়ং প্রেমা- ৭৭।৬
হরির্লব্ধোপাধিঃ ১১০।৮
হরেঃ কাকূন্মিশ্রাং ১২২।৯
হরে ! দত্তস্বান্তা ৯০।৭
হরৌ যস্মিন্নগ্রে ২৯।৩
হরৌ সন্দেশায় ৯৯।৭
হসন্ পৃষ্ঠালম্বী ১১১।৮
হিমং বন্দে নীচৈ- ৫৫।৪

শ্রীশ্রীগৌড়ীয়-গৌরব-গ্রন্থ-গুটিকা—

কবিকুলশিখামণি-শ্রীল-রূপগোস্বামি-প্রভুপাদ-বিরচিতম্

# শ্রীশ্রীহংসদূতম্

বিক্রেয় নহীঁ হৈ

শ্রীশ্রীরাধারমণায় নমঃ

১। দুকূলং বিভ্রাণো দলিতহরিতালদ্যুতিহরং, জবাপুষ্পশ্রেণীরুচি-রুচিরপাদাম্বুজতলঃ।
তমালশ্যামাঙ্গো দরহসিতলীলাঞ্চিতমুখঃ, পরানন্দাভোগঃ স্ফুরতু হৃদি মে কোঽপি পুরুষঃ॥

২। যদা যাতো গোপীহৃদয়মদনো নন্দসদনা,-ন্মুকুন্দো গান্দিন্যাস্তনয়মনুরুন্ধন্[1]-মধুপুরীম্।
তদামাঙ্ক্ষীচ্চিন্তাসরিতি ঘনঘূর্ণাপরিচয়ৈ,-রগাধায়াং বাধাময়পয়সি রাধা বিরহিণী॥

৩। কদাচিৎ খেদাগ্নিং বিঘটয়িতুমন্তর্গতমসৌ, সহালীভির্লেভে তরলিতমনা যামুনতটীম্।
চিরাদস্যাশ্চিত্তং পরিচিতকুটীরাবকলনা,-দবস্থা তস্তার স্ফুটমথ সুষুপ্তেঃ প্রিয়সখী[2]॥

৪। তদা নিস্পন্দাঙ্গী কলিতনলিনীপল্লবকুলৈঃ, পরীণাহাৎ প্রেম্ণামকুশলশতাশঙ্কিহৃদয়ৈঃ।
দৃগন্তোগম্ভীরীকৃত-মিহিরপুত্রী-লহরিভি,-র্বিলীনা ধূলীনামুপরি পরিবব্রে পরিজনৈঃ॥

৫। ততস্তাং ন্যস্তাঙ্গীমুরসি ললিতায়াঃ কমলিনী,-পলাশৈঃ কালিন্দীসলিলশিশিরৈর্বীজিততনুম্।
পরাবৃত্তশ্বাসাঙ্কুরকলিতকণ্ঠীং[3] কলয়তাং, সখীসন্দোহানাং প্রমদভরশালী ধ্বনিরভূৎ॥

৬। নিধায়াঙ্কে পঙ্কেরুহদলবিটঙ্কস্য ললিতা, ততো রাধাং নীরাহরণসরণী[4]-ন্যস্তচরণা।
মিলন্তং কালিন্দীপুলিনভুবি খেলাঞ্চিতগতিং, দদর্শাগ্রে কঞ্চিন্মধুরবিরুতং শ্বেতগরুতম্॥

৭। তদালোকস্তোকোচ্ছ্বসিতহৃদয়া সাদরমসৌ, প্রণামং শংসন্তী লঘু লঘু সমাসাদ্য সবিধম্।
ধৃতোৎকণ্ঠা সদ্যো হরিসদসি সন্দেশহরণে, বরং দূতং মেনে তমতিললিতং হন্ত ললিতা॥

৮। অমর্ষাৎ প্রেমের্ষ্যাং সপদি দধতী কংসমথনে[5], প্রবৃত্তা হংসায় স্বমভিলষিতং শংসিতুমসৌ।
ন তস্যা দোষোঽয়ং যদিহ বিহগং প্রার্থিতবতী, ন কস্মিন্ বিশ্রম্ভং দিশতি হরিভক্তিপ্রণয়িতা?

৯। পবিত্রেষু প্রায়ো বিরচয়সি তোয়েষু বসতিং, প্রমোদং নালীকে বহসি বিষদাত্মা[6] স্বয়মপি[7]।
অতোঽহং দুঃখার্ত্তা শরণমবলা ত্বাং গতবতী, ন ভিক্ষা[8] সৎপক্ষে ব্রজতি হি কদাচিদ্বিফলতাম্॥

---

**পাঠান্তরাণাং সাঙ্কেতিকচিহ্নানি—‘ক’** বসুমতী-যন্ত্রালয়-প্রকাশিত-গ্রন্থঃ; **‘খ’** বিভাসপ্রকাশ-গঙ্গোপাধ্যায়-সম্পাদিত-গ্রন্থঃ; **‘গ’** জীবানন্দবিদ্যাসাগর-সম্পাদিত-কাব্যসংগ্রহান্তর্গত-গ্রন্থঃ (১ম ভাগঃ); **‘ঘ’** বরাহনগর শ্রীগৌরাঙ্গগ্রন্থ-মন্দিরস্থ-৩৯৭ সংখ্যক করলিপিঃ; **‘ঙ’** তত্রস্থ-৫৬৬-সংখ্যক-করলিপিঃ; **‘চ’** বঙ্গীয়-সাহিত্যপরিষদঃ ১৯-সংখ্যক-করলিপিঃ; **‘ছ’** তত্রস্থ-১৪৯৪-সংখ্যক-করলিপিঃ; **‘জ’** তত্রত্য-৪৫৭-সংখ্যক করলিপিঃ; **‘ঝ’** পুরী-বড়-উড়িয়ামঠস্থ-করলিপিঃ।

---

১। -বিন্দন্- (গ, ঘ, ছ, জ); ২। সহচরী (ছ); ৩। -চলিতকণ্ঠীং (ক, গ, চ); ৪। -সরণৌ (ঘ, ঙ, ছ, জ); ৫। -দমনে (ক); ৬। বিশদাত্মা (খ); ৭। স্বয়মসি (গ, ঘ, ছ, জ, ঝ,); ৮। যাচ্ঞা (ক, খ, ঘ, ঙ, চ, ছ, জ, ঝ)।

১০। চিরং বিস্মৃত্যাস্মান্ বিরহদহনজ্বালবিকলাঃ, কলাবান্ সানন্দং বসতি মথুরায়াং মধুরিপুঃ।
তদেতং সন্দেশং স্বমনসি সমাধায়[১] নিখিলং, ভবান্ ক্ষিপ্রং তস্য শ্রবণপদবীং সঙ্গময়তু॥
১১। নিরস্তপ্রত্যূহং ভবতু ভবতো বর্ত্মনি শিবং, সমুত্তিষ্ঠ ক্ষিপ্রং মনসি মুদমাধায় সদয়ম্।
অধস্তাদ্ধাবন্তো লঘু লঘু সমুত্তানময়নৈ,-র্ভবন্তং বীক্ষন্তাং কুতুকতরলা গোপশিশবঃ॥
১২। কিশোরোত্তংসোঽসৌ[২] কঠিনমতিনা দানপতিনা, যয়া নিন্যে তূর্ণং পশুপ[৩]-যুবতী[৪]-জীবিতপতিঃ।
ত্বয়া গন্তব্যা তে নিখিলজগদেকপ্রথিতয়া, পদব্যা ভব্যানাং তিলক! কিল দাশার্হনগরী॥
১৩। গলদ্বাষ্পাসারপ্লুতধবলগণ্ডা মৃগদৃশো, বিদূয়ন্তে যত্র প্রবল[৫]-মদনাবেশবিবশাঃ।
ত্বয়া বিজ্ঞাতব্যা হরিচরণসঙ্গপ্রণয়িনো, ধ্রুবং সা চক্রাঙ্কী[৬] রতিসখশতাঙ্গস্য পদবী॥
১৪। পিবন্ জম্বুশ্যামং মিহিরদুহিতুর্বারি মধুরং, মৃণালীভুঞ্জানো হিমকরকলাকোমলরুচঃ।
ক্ষণং হৃষ্টস্তিষ্ঠন্নিবিড়বিটপে শাখিনি সখে! সুখেন প্রস্থানং রচয়তু ভবান্ বৃষ্ণিনগরে॥
১৫। বলাদাক্রন্দন্তী রথপথিকমক্রূরমিলিতং, বিদূরাদাভীরীততিরনুযযৌ যেন রমণম্।
তমাদৌ পন্থানং রচয় চরিতার্থা ভবতু তে, বিরাজন্তী সর্ব্বোপরি পরমহংসস্থিতিরিয়ম্॥
১৬। অকস্মাদস্মাকং হরিরপহরন্নংশুকচয়ং[৭], যমারূঢ়ো গূঢ়প্রণয়লহরীঃ কন্দলয়িতুম্।
তব শ্রান্তস্যান্তঃস্থগিতরবিবিম্বঃ কিশলয়ৈঃ, কদম্বঃ কাদম্ব! ত্বরিতমবলম্বঃ স ভবিতা॥
১৭। কিরন্তী লাবণ্যং দিশি দিশি শিখণ্ডস্তবকিনী, দধানা সাধীয়ঃ কনকবিমলদ্যোতি বসনম্।
তমালশ্যামাঙ্গী সরলমুরলীচুম্বিতমুখী, জগৌ চিত্রং যত্র প্রকটপরমানন্দলহরী॥
১৮। তয়া ভূয়ঃ ক্রীড়ারভসবিকসদ্-[৮]বল্লববধূ,-বপুর্বল্লীভ্রশ্যন্মৃগমদকণশ্যামলিকয়া।
বিধাতব্যো হল্লীসকদলিতমল্লীলতিকয়া, সমন্তাতুল্লাসস্তব মনসি রাসস্থলিকয়া॥
১৯। তদন্তে বাসন্তীবিরচিতমনঙ্গোৎসবকলা,-চতুঃশালং শৌরেঃ স্ফুরতি ন দৃশৌ তত্র বিকিরেঃ।
তদালোকোদ্ভেদ[৯]-প্রমদভরবিস্মারিতগতি,-ক্রিয়ে জাতে[১০] তাবত্ত্বয়ি বত হতা গোপবনিতা॥
২০। মম স্যাদর্থানাং ক্ষতিরিহ বিলম্বাদ্‌যদপি তে, বিলোকেথাঃ সর্ব্বং তদপি হরিকেলিস্থলমিদম্।
তবেয়ং ন ব্যর্থা ভবতু শুচিতা কঃ স হি সখে! গুণো যশ্চাণুরদ্বিষি মতিনিবেশায় ন ভবেৎ?
২১। সকৃদ্বংশীনাদশ্রবণমিলিতাভীরবনিতা,-রহঃক্রীড়াসাক্ষী প্রতিপদলতাসদ্ম[১১]-সুভগঃ।
স ধেনূনাং বন্ধুর্মধুমথনখট্টায়িতশিলঃ, করিষ্যত্যানন্দং সপদি তব গোবর্দ্ধনগিরিঃ॥
২২। তমেবাদ্রিং চক্রাঙ্কিতকরপরিষ্বঙ্গরসিকং, মহীচক্রে শঙ্কেমহি শিখরিণাং শেখরতয়া।
অরাতিং জ্ঞাতীনাং ননু হরিহয়ং যঃ পরিভবন্, যথার্থং স্বং নাম ব্যধিত ভুবি গোবর্দ্ধন ইতি॥
২৩। তমালস্যালোকাদ্‌গিরিপরিসরে সন্তি চপলাঃ, পুলিন্দ্যো গোবিন্দস্মরণ-রভসোত্তপ্ত-বপুষঃ।
শনৈস্তাসাং তাপং[১২] ক্ষণমপনয়ন্ যাস্যতি ভবা,-নবশ্যং কালিন্দীসলিলশিশিরৈঃ পক্ষ-পবনৈঃ॥
২৪। তদন্তে শ্রীকান্তস্মরসমরধাটী-পুলকিতা, কদম্বানাং বাটী রসিকপরিপাটীং স্ফুটয়তি।
ত্বমাসীনস্তস্যাং ন যদি পরিতো নন্দসি ততো, বভূব ব্যর্থা তে ঘনরসনিবেশ[১৩]-ব্যসনিতা॥
২৫। শরন্মেঘশ্রেণী-প্রতিভটমরিষ্টাসুরশির,-শ্চিরং শুষ্কং বৃন্দাবনপরিসরে দ্রক্ষ্যতি ভবান্।
যদারোঢ়ুং দূরান্মিলতি কিল কৈলাসশিখরি,-ভ্রমাক্রান্তস্বান্তো গিরিশসুহৃদঃ কিঙ্করগণঃ॥

---

*১। সমারোপ্য (ক, ঘ, ঙ, ছ, জ, ঝ); ২। স বৈদগ্ধীসিন্ধুঃ (ঘ, ঙ); ৩। পতগ (ক); ৪। রমণী- (ক);*
৫। প্রমদ- (ক); ৬। চক্রাঙ্গী (ঘ, ঙ); ৭। -ভরং (ক, ছ, জ); ৮। -বিলসদ্- (ঘ, ঙ); ৯। -ভেদি- (ঘ, ঙ, ছ, জ); ১০। জানে (খ, গ); ১১। -সঙ্গ- (ক, জ); ১২। শনৈস্তাপং তাসাং (খ); ১৩। -নিবাস- (ক)।

২৬। রুবন্ যাহি স্বৈরং চরমদশয়া চুম্বিতরুচো, নিতম্বিন্যো বৃন্দাবনভুবি সখে! সন্তি বহবঃ।
পরাবর্ত্তিষ্যন্তে তুলিতমুরজিন্নূপুররবা,-স্তব ধ্বানাত্তাসাং বহিরপি গতাঃ ক্ষিপ্রমসবঃ॥

২৭। ত্বমাসীনঃ শাখান্তরমিলিতচণ্ডত্বিষি সুখং, দধীথা ভাণ্ডীরে ক্ষণমপি ঘনশ্যামলরুচৌ।
ততো হংসাবিভ্রন্নিখিলনভসশ্চিক্রমিষয়া, স বর্দ্ধিষ্ণুং বিষ্ণুং কলিতদরচক্রং তুলয়িতা॥

২৮। ত্বমষ্টাভির্নেত্রৈর্বিগলদমলপ্রেমসলিলৈ,-র্মুহুঃ সিক্তস্তম্বাং[১] চতুর-চতুরাস্যস্তুতিভুবম্।
জিহীথা বিখ্যাতাং স্ফুটমিহ ভবদ্বান্ধবরথং, প্রবিষ্টং মংস্যন্তে বিধিমটবিদেব্যস্ত্বয়ি গতে॥

২৯। উদঞ্চন্নেত্রাম্ভঃপ্রসরলহরীপিচ্ছিলপথ,-স্খলৎপাদন্যাসপ্রণিহিতবিলম্বাকুলধিয়ঃ।
হরৌ যস্মিন্নগ্রে ত্বরিতযমুনাকূলগমন,-স্পৃহাক্ষিপ্তা গোপ্যো যযুরনুপদং কামপি দশাম্॥

৩০। মুহুর্লাস্যক্রীড়াপ্রমদমিলদাহোপুরুষিকা,-বিকাশেন ভ্রষ্টৈঃ ফণিমণিকুলৈর্ধূমলরুচৌ।
পুরস্তস্মিন্নীপদ্রুমকুসুমকিঞ্জল্কসুরভৌ, ত্বয়া পুণ্যে[২] পেয়ং মধুরমুদকং কালিয়হ্রদে॥

৩১। তৃণাবর্ত্তারাতেবির্রহদবসন্তাপিততনোঃ, সদাভীরীবৃন্দপ্রণয়বহুমানোন্নতিবিদঃ।
প্রণেতব্যো[৩] নব্যস্তবকভরসংবর্দ্ধিতশুচ,-স্ত্বয়া বৃন্দাদেব্যাঃ পরমবিনয়াদ্বন্দনবিধিঃ॥

৩২। ইতি ক্রান্ত্বা কেকাকৃতবিরুতিমেকাদশবনীং, ঘনীভূতং চূতৈর্ব্রজ মধুবনং[৪] দ্বাদশমিদম্।
পুরী যস্মিনাস্তে যদুকুলভুবাং নির্ম্মলযশো,-ভরাণাং ধারাভির্ধবলিতধরিত্রীপরিসরা॥

৩৩। নিকেতৈরাকীর্ণা গিরিশগিরিডিম্ভপ্রতিভটৈ,-রবষ্টম্ভস্তম্ভাবলিবিলসিতৈঃ পুষ্পিতবনা।
নিবিষ্টা কালিন্দীতটভুবি তবাধাস্যতি সখে! সমন্তাদানন্দং মধুরজলবৃন্দা মধুপুরী॥

৩৪। বৃষঃ শম্ভোর্যস্যাং দশতি[৫] নবমেকত্র যবসং, বিরিঞ্চেরন্যস্মিন্ গিলতি কলহংসো বিসলতাম্।
ক্বচিৎ ক্রৌঞ্চারাতেঃ কবলয়তি কেকী বিষধরং, বিলীঢ়ে শল্লক্যা বলরিপুকরী পল্লবমিতঃ॥

৩৫। অবোধিষ্ঠাঃ কায়ান্ন[৬] হি বিচলিতাং[৭] প্রচ্ছদপটীং, বিমুক্তামজ্ঞাসীঃ পথি পথি ন মুক্তাবলিমপি?
অয়ি শ্রীগোবিন্দস্মরণমদিরামত্তহৃদয়ে! সতীতি খ্যাতিং তে হসতি কুলটানাং কুলমিদম্॥

৩৬। অসব্যং বিভ্রাণা পদমধৃতলাক্ষারসমসৌ, প্রয়াতাহং মুগ্ধে! বিরম মম বেশৈঃ কিমধুনা?
অমন্দাদাশঙ্কে সখি! পুরপুরন্ধ্রীকলকলা,-দলিন্দাগ্রে বৃন্দাবনকুসুমধন্বা বিজয়তে॥

৩৭। অয়ং লীলাপাঙ্গ-স্নপিতপুরবীথী-পরিসরো, নবাশোকোত্তংসশ্চলতি পুরতঃ কংসবিজয়ী।
কিমস্মানেতস্মান্মণিভবনপৃষ্ঠাদ্বিনুদতী, ত্বমেকা স্তব্ধাক্ষি! স্থগয়সি গবাক্ষাবলিমপি?

৩৮। মুহুঃ শূন্যাং দৃষ্টিং বহসি রহসি ধ্যায়সি সদা, শৃণোষি প্রত্যক্ষং ন পরিজনবিজ্ঞাপনশতম্।
অতঃ শঙ্কে পঙ্কেরুহমুখি! যযৌ শ্যামলরুচিঃ, স যূনামুত্তংসস্তব নয়নবীথীপথিকতাম্॥

৩৯। বিলজ্জং মা রোদীরিহ সখি! পুনর্যাস্যতি হরি,-স্তবাপাঙ্গ-ক্রীড়ানিবিড়-পরিচর্য্যা-গ্রহিলতাম্।
ইতি স্বৈরং যস্যাং পথি পথি মুরারেরভিনব,-প্রবেশে নারীণাং রতিরভসজল্পা ববৃধিরে[৮]॥
[ পঞ্চভিঃ কুলকম্ ]

৪০। সখে! সাক্ষাদ্দামোদরবদনচন্দ্রাবকলন,-স্ফুরৎ-প্রেমানন্দপ্রকরলহরীচুম্বিতধিয়ঃ।
মুহুস্তত্রাভীরীসমুদয়শিরোন্যস্তবিপদ,-স্তবাক্ষোরানন্দং বিদধতি পুরা পৌরবনিতাঃ॥

৪১। অথ ক্রামং ক্রামং ক্রমঘটনয়া সঙ্কটতরা,-ন্নিবাসান্ বৃষ্ণীনামনুসর পুরীমধ্যবিশিখান্।
মুরারাতের্যত্র স্থগিতগগনাভির্বিজয়তে, পতাকাভিঃ সন্তর্পিতভুবনমন্তঃপুরবরম্॥

---

১। -স্তম্ভাং (খ, গ); ২। পুণ্যৈঃ (ঘ), পুণ্যং (ঙ); ৩। বিধাতব্যো (ক, জ, ঝ); ৪। ব্রজমনু বনং (খ), ব্রজমনুবনং (গ); ৫। গ্রসতি (জ); ৬। কাশান্ন (গ); ৭। বিঘটিতাং (গ, ঘ, ঙ, চ, ছ, ঝ); ৮। ববনিরে (খ, গ, চ, ছ, জ)।

৪২। যত্তুৎসঙ্গে তুঙ্গস্ফটিকরচিতাঃ সন্তি পরিতো, মরালা মাণিক্যপ্রকরঘটিতত্রোটিচরণাঃ।
সুহৃদ্‌বুদ্ধ্যা হংসাঃ কলিতমধুরস্যাম্বুজভুবঃ, সমর্য্যাদা যেষাং সপদি পরিচর্য্যাং বিদধতি ॥

৪৩। চিরান্মৃগ্যন্তীনাং পশুপরমণীনামপি কুলৈ[১],-রলব্ধং কালিন্দীপুলিনবিপিনে লীনমভিতঃ[২]।
মদা[৩]-লোকোল্লাসিস্মিতপরিচিতাস্ত্বং প্রিয়সখি[৪]! স্ফুরন্তং বীক্ষিষ্যে পুনরপি কিমগ্রে মুরভিদম্?

৪৪। বিষাদং মা কার্ষীদ্রু তমবিতথব্যাহৃতিরসৌ, সমাগন্তা রাধে! ধৃতনবশিখণ্ডস্তব সখা।
ইতি ব্রূতে যস্যাং শুকমিথুনমিন্দ্রানুজকৃতে, যদাভীরীবৃন্দৈরুপহৃত[৫]-মভূত্তুদ্ধবকরে ॥

[ যুগ্মকম্ ]

৪৫। ঘনশ্যামা ভ্রাম্যত্যুপরি হরিহর্ম্ম্যস্য শিখিভিঃ, কৃতস্তোত্রা মুগ্ধৈরগুরুজনিতা[৬] ধূমলতিকা[৭]।
তদালোকাদ্ধীর! স্ফুরতি তব চেন্মানসরুচি,-র্জিতং তর্হি স্বৈরং জন[৮]-সহনিবাসপ্রিয়তয়া ॥

৪৬। ততো মধ্যেকক্ষং প্রতিনবগবাক্ষস্তবকিতং, চলন্মুক্তালম্বস্ফুরিতমমলস্তম্ভনিবহম্।
ভবান্ দ্রষ্টা হেমোল্লিখিতদশমস্কন্ধচরিতৈ,-র্লসদ্ভিত্তিপ্রান্তং মুরবিজয়িনঃ কেলিনিলয়ম্ ॥

৪৭। অলিন্দে যস্যান্তে মরকতময়ী যষ্টিরমলা, শয়ালুর্যাং রাত্রৌ মদকলকলাপী কলয়তি।
নিরাতঙ্কস্তস্যাঃ শিখরমধিরুহ্য শ্রমনুদং, প্রতীক্ষেথা ভ্রাতর্বরমবসরং যাদবপতেঃ ॥

৪৮। নিবিষ্টঃ পল্যঙ্কে মৃদুলতরতূলীধবলিতে, ত্রিলোকীলক্ষ্মীণাং ককুদি দরসাচীকৃততনুঃ।
অমন্দং পূর্ণেন্দুপ্রতিমমুপধানং প্রমুদিতো, নিধায়াগ্রে তস্মিন্নুপহিতকফোণিদ্বয়ভরঃ ॥

৪৯। উদঞ্চৎকালিন্দীসলিল[৯]-সুভগম্ভাবুকরুচিঃ, কপোলান্তে প্রেঙ্খন্মণিমকরমুদ্রামধুরিমা।
বসানঃ কৌষেয়ং জিতকনকলক্ষ্মীপরিমলং, মুকুন্দস্তে সাক্ষাৎ প্রমদসুধয়া সেক্ষ্যতি দৃশৌ ॥

৫০। বিকদ্রুঃ পৌরাণীরখিলকুলবৃদ্ধো যদুপতে,-রদূরাদাসীনো মধুরভণিতীর্গাস্যতি তদা[১০]।
পুরস্তাদাভীরীগণভয়দনাম্না স কঠিনো, মণিস্তম্ভালম্বী কুরুকুলকথাং সঙ্কলয়িতা ॥

৫১। শিনীনামুত্তংসঃ স কিল কৃতবর্ম্মাপ্যুভয়তঃ, প্রণেষ্যেতে বালব্যজনযুগলান্দোলনবিধিম্।
স জানুভ্যামষ্টাপদভুবমবষ্টভ্য ভবিতা, গুরোঃ শিষ্যো নূনং পদকমলসংবাহনরতঃ ॥

৫২। বিহঙ্গেন্দ্রো যুগ্মীকৃতকরসরোজো ভুবি পুরঃ, কৃতাসঙ্গো[১১] ভাবী প্রজবিনি নিদেশেঽর্পিতমনাঃ।
ছদদ্বন্দ্বে যস্য ধ্বনতি মথুরাবাসিবটবো, ব্যুদস্যন্তে সামস্বরকলিত[১২]-মন্যোঽন্যকলহম্ ॥

৫৩। ন নির্ব্বক্তুং দামোদরপদকনিষ্ঠাঙ্গুলিনখ,-দ্যুতীনাং লাবণ্যং ভবতি চতুরাস্যোঽপি চতুরঃ।
তথাপি স্ত্রীপ্রজ্ঞাসুলভতরলত্বাদহমসৌ, প্রবৃত্তা তন্মূর্ত্তিস্তবরতিমহাসাহসরসে ॥

৫৪। বিরাজন্তে যস্য ব্রজশিশুকুলস্তেয়[১৩]-বিকল,-স্বয়ম্ভূচূড়াগ্রৈর্লুলিতশিখরাঃ পাদনখরাঃ।
ক্ষণং যানালোক্য প্রকটপরমানন্দবিবশঃ[১৪], স দেবর্ষির্মুক্তানপি তনুভৃতঃ শোচতি ভৃশম্ ॥

৫৫। সরোজানাং ব্যূহঃ শ্রিয়মভিলষন্ যস্য পদয়ো,-র্যযৌ রাগাঢ্যানাং বিধুরমুদবাসব্রতবিধিম্।
হিমং বন্দে নীচৈরনুচিতবিধানব্যসনিনাং, যদেষাং প্রাণান্তং দমনমনুবর্ষং প্রণয়তি ॥

৫৬। রুচীনামুল্লাসৈর্মরকতময়স্থূলকদলী,-কদম্বাহঙ্কারং কবলয়তি যস্যোরুযুগলম্।
যদালানস্তম্ভদ্যুতিমবললম্বে বলভৃতাং[১৫], মদাদুদ্দামানাং[১৬] পশুপরমণীচিত্তকরিণাম্ ॥

---

১। চিরান্মৃগ্যন্তীভিঃ পশুপরমণীভির্ন্নবলাৎ (ঘ, ঙ); ২। লীনবপুষম্ (ছ); ৩। সদা- (ক); ৪। সহচরি! (ক, চ, ছ, জ); ৫। উপধৃত- (ক), উপস্থৃত (খ, গ); ৬। -রচিতা (ক); ৭। -লহরী (ঘ, ঙ, চ); ৮। জল- (ক), জড়- (ঘ, ঙ, ছ); ৯। -লহরী- (ঘ, চ); ১০। সদা (ক), তথা (ছ); ১১। কৃতাশঙ্কো (খ, গ); ১২। -জনিত- (ক); ১৩। -স্তেন- (ঝ); ১৪। -বিরসঃ (ক, গ); ১৫। বলবতাং (ক, ছ, জ, ঝ); ১৬। বলাদুদ্দামানাং (ক), মদাদুন্নদ্ধানাং (চ)।

৫৭। সখে ! যস্যাভীরীনয়নসফরীজীবনবিধৌ, নিদানং গাম্ভীর্য্যপ্রসরকলিতা নাভিসরসী ।
যতঃ কল্পস্যাদৌ সনকজনকোৎপত্তিবড়ভী,-গভীরান্তঃকক্ষাধৃতভুবনমম্ভোরুহমভূৎ ॥

৫৮। দ্যুতিং ধত্তে যস্য ত্রিবলিলতিকাসঙ্কটতরং, সখে ! দামশ্রেণীক্ষণপরিচয়াভিজ্ঞমুদরম্ ।
যশোদা যস্যান্তঃ সুরনরভুজঙ্গৈঃ পরিবৃতং, মুখদ্বারা বারদ্বয়মবলুলোকে ত্রিভুবনম্ ॥

৫৯। উরো যস্য স্ফারং স্ফুরতি বনমালাবলয়িতং, বিতন্বানং তন্বীজনমনসি সদ্যো মনসিজম্ ।
মরীচিভির্যস্মিন্ রবিনিবহতুল্যোঽপি বহতে, সদা খদ্যোতাভাং ভুবনমধুরঃ কৌস্তুভমণিঃ ॥

৬০। সমন্তাদুন্মীলদ্বলভিদুপলস্তম্ভযুগল,-প্রভাজৈত্রং কেশিদ্বিজলুলিতকেয়ূরললিতম্ ।
স্মরক্লাম্যদ্গোপীপটলহঠকণ্ঠগ্রহপরং, ভুজদ্বন্দ্বং যস্য স্ফুটসুরভিগন্ধং[1] বিজয়তে ॥

৬১। জিহীতে সাম্রাজ্যং জগতি নবলাবণ্যলহরী,-পরীপাকস্যান্তর্মুদিতমদনাবেশমধুরম্ ।
নটদ্ভ্রূবল্লীকং স্মিতনবসুধাকেলিসদনং, স্ফুরন্মুক্তাপঙ্‌ক্তিপ্রতিমরদনং যস্য বদনম্ ॥

৬২। কিমেভির্ব্যাহারৈঃ কলয় কথয়ামি স্ফুটমহং, সখে ! নিঃসন্দেহং পরিচয়পদং কেবলমিদম্ ।
পরানন্দো যস্মিন্নয়নপদবীভাজি ভবিতা, ত্বয়া বিজ্ঞাতব্যো মধুররব ! সোঽয়ং[2] মধুরিপুঃ ॥

৬৩। বিলোকেথাঃ কৃষ্ণং মদকলমরালীরতিকলা,-বিদগ্ধ ! ব্যামুগ্ধং যদি[3] পুরবধূবিভ্রমভরৈঃ ।
তদা নাস্মান্ গ্রাম্যাঃ শ্রবণপদবীং তস্য গময়েঃ, সুধাপূর্ণং চেতঃ কথমপি ন তক্রং মৃগয়তে ॥

৬৪। যদা বৃন্দারণ্যস্মরণলহরীহেতুরমলং[4], পিকানাং বেবেষ্টি প্রতিহরিতমুচ্চৈঃ কুহুরুতম্ ।
বহন্তে বা বাতাঃ স্ফুরিতগিরিমল্লীপরিমলা[5],-স্তদৈবাস্মাকীনাং গিরমুপহরেথা মুরভিদি ॥

৬৫। পুরা তিষ্ঠন্ গোষ্ঠে নিখিলরমণীভ্যঃ প্রিয়তয়া, ভবান্ যস্যাং গোপীরমণ ! বিদধে গৌরবভরম্ ।
সখী তস্যা বিজ্ঞাপয়তি ললিতা ধীরললিত ! প্রণম্য শ্রীপাদাম্বুজকনকপীঠোপরিসরে ॥

৬৬। প্রযত্নাদাবাল্যং নবকমলিনীপল্লবকুলৈ,-স্ত্বয়া ভূয়ো যস্যাঃ কৃতমহহ সংবর্দ্ধনমভূৎ ।
চিরাদূধোভারাস্ফুরণগরিমাক্রান্তজঘনা, বভূব প্রষ্ঠৌহী মুরমথন[6] ! সেয়ং কপিলিকা ॥

৬৭। সমীপে নীপানাং ত্রিচতুরদলা হন্ত গমিতা, ত্বয়া মাকন্দস্য প্রিয়সহচরীভাবনিয়তিম্ ।
ইয়ং সা বাসন্তী গলদমলমাধ্বীকপটলী,-মিষাদগ্রে গোপীরমণ ! রুদতি রোদয়তি নঃ ॥

৬৮। প্রসূতো দেবক্যা মুরমথন[7] ! যঃ কোঽপি পুরুষঃ, স জাতো গোপালাভ্যুদয়পরমানন্দবসতিঃ ।
ধৃতো যো গান্দিন্যা কঠিনজঠরে সম্প্রতি ততঃ, সমন্তাদেবাস্তং শিব শিব গতা গোকুলকথা ॥

৬৯। অরিষ্টেনাহূতাঃ[8] পশুপসুদৃশো যান্তি বিপদং, তৃণাবর্ত্তাক্রান্ত্যা রচয়তি ভয়ং চত্বরচয়ঃ ।
অমী ব্যোমীভূতা ব্রজবসতিভূমীপরিসরা, বহন্তে নস্তাপং মুরহর ! বিদূরং ত্বয়ি গতে ॥

৭০। ত্বয়া নাগন্তব্যং কথমিহ[9] হরে ! গোষ্ঠমধুনা, লতাশ্রেণী বৃন্দাবনভুবি যতোঽভূদ্বিষময়ী ?
প্রসূনানাং গন্ধং কথমিতরথা বাতনিহিতং, ভজন্ সদ্যো মূর্চ্ছাং বহতি নিবহো গোপসুদৃশাম্ ?

৭১। কথং সঙ্গোঽস্মাভিঃ সহ সমুচিতঃ সম্প্রতি হরে ! বয়ং গ্রাম্যা নার্য্যস্ত্বমসি নৃপকন্যার্চ্চিতপদঃ ?
গতঃ কালো যস্মিন্ পশুপরমণীসঙ্গমকৃতে, ভবান্ ব্যগ্রস্তস্থৌ তমসি গৃহবাটীবিটপিনঃ[10] ॥

৭২। বয়ং ত্যক্তাঃ স্বামিন্ ! যদিহ তব কিং দূষণমিদং, নিসর্গঃ শ্যামানামযমতিতরাং দুষ্পরিহরঃ ?
কুহূকণ্ঠৈরণ্ডাবধি সহনিবাসাৎ পরিচিতা, বিসৃজ্যন্তে সদ্যঃ কলিতনবপক্ষৈর্বলিভুজঃ ॥

---

১। স্ফুটমগুরুগন্ধং (ছ); ২। মধুরমধুরোঽয়ম্ (ছ); ৩। যদু- (চ); ৪। -রমণং (ক); ৫। -প্রবিমলা- (গ); ৬। মধুমথন (চ); ৭। মধুমথন (ক, চ); ৮। অরিষ্টেনোদ্ধৃতাঃ (ঘ, ঙ); ৯। কথমপি (ঘ, ঙ); ১০। -বিটপিনি (ক, ঘ, ঙ, ছ, জ)।

৭৩। অয়ং পূর্ব্বো রঙ্গঃ কিল বিরচিতো[১] যস্য তরসা, রসাদাখ্যাতব্যং পরিকলয় তন্নাটকমিদম্।
ময়া প্রষ্টব্যোঽসি প্রথমমিতি বৃন্দাবনপতে! কিমাহো রাধেতি স্মরসি কৃপণং[২] বর্ণযুগলম্[৩]?

৭৪। অয়ে কুঞ্জদ্রোণীকুহরগৃহমেধিন্! কিমধুনা, পরোক্ষং বক্ষ্যন্তে পশুপরমণীদুর্নিয়তয়ঃ?
প্রবীণা গোপীনাং তব চরণপদ্মেঽর্পিতমনা[৪], যযৌ রাধা সাধারণসমুচিতপ্রশ্নপদবীম্॥

৭৫। ত্বয়া গোষ্ঠং গোষ্ঠীতিলক! কিল চেদ্বিস্মৃতমিদং, ন তূর্ণং ধূমোর্ণাপতিরপি বিধত্তে যদি কৃপাম্।
অহর্বৃন্দং বৃন্দাবনকুসুমপালীপরিমলৈ,-র্দুরালোকং শোকাস্পদমথ[৫] কথং নেষ্যতি সখী?

৭৬। তরঙ্গৈঃ কুর্ব্বাণা শমনভগিনীলাঘবমসৌ, নদীং কাঞ্চিদ্গোষ্ঠে নয়নজলপূরৈরজনয়ৎ।
ইতীবাস্যা দ্বেষাদভিমতদশাপ্রার্থনময়ীং, মুরারে! বিজ্ঞপ্তিং নিশময়তি মানী ন শমনঃ॥

৭৭। কৃতাকৃষ্টিক্রীড়ং কিমপি তব রূপং মম সখী, সকৃদ্দৃষ্ট্বা দূরাদহিতহিতবোধোজ্ঝিতমতিঃ।
হতা সেয়ং[৬] প্রেমানলমনুবিশন্তী সরভসং, পতঙ্গীবাত্মানং মুরহর! মুহুর্দাহিতবতী॥

৭৮। ময়া বাচ্যঃ কিংবা ত্বমিহ নিজদোষাৎ পরমসৌ, যযৌ মন্দা বৃন্দাবনকুমুদবন্ধো! বিধুরতাম্।
যদর্থং দুঃখাগ্নির্দহতি হি[৭] তমদ্যাপি হৃদয়া,-ন্ন যস্মাদ্দুর্মেধা লবমপি ভবন্তং দবয়তি॥

৭৯। ত্রিবক্রাহো ধন্যা হৃদয়মিব তে স্বং বপুরিয়ং[৮], সমাসাদ্য স্বৈরং যদিহ বিলসন্তী নিবসতি।
ধ্রুবং পুণ্যভ্রংশাদজনি সরলেয়ং মম সখী, প্রবেশস্তত্রাসীৎ[৯] ক্ষণমপি যদস্যা ন সুলভঃ॥

৮০। কিমাবিষ্টা ভূতৈঃ সপদি যদি বাক্রূরফণিনা, ক্ষতাপস্মারেণ চ্যুতমতিরকস্মাৎ কিমপতৎ?
ইতি ব্যগ্রৈরস্যাং গুরুভিরভিতো বেণুনিনদ[১০],-শ্রবাদ্বিভ্রষ্টায়াং[১১] মুরহর! বিকল্পা[১২] বিদধিরে॥

৮১। নবীনেয়ং সম্প্রত্যকুশলপরীপাকলহরী, নরীনর্ত্তি স্বৈরং মম সহচরীচিত্তকুহরে।
জগন্নেত্রশ্রেণীমধুর! মথুরায়াং নিবসত,-শ্চিরাদার্ত্তা বার্ত্তামপি তব[১৩] যদেষা ন লভতে॥

৮২। জনান্ সিদ্ধাদেশান্ নমতি ভজতে মান্ত্রিকগণান্, বিধত্তে শুশ্রূষামধিকবিনয়েনৌষধিবিদাম্।
ত্বদীক্ষাদীক্ষায়ৈ পরিচরতি ভক্ত্যা গিরিসুতাং, মনীষা হি ব্যগ্রা কিমপি সুখহেতুং[১৪] ন মনুতে॥

৮৩। পশূনাং পাতারং ভুজগরিপুপত্রপ্রণয়িনং, স্মরোদ্বর্দ্ধিক্রীড়ং নিবিড়ঘনসারদ্যুতিহরম্।
সদাভ্যর্ণে নন্দীশ্বরগিরিভুবো রঙ্গরসিকং, ভবন্তং কংসারে! ভজতি ভবদাপ্ত্যৈ মম সখী॥

৮৪। ভবন্তং সন্তপ্তা বিদলিততমালাঙ্কুররসৈ,-র্বিলিখ্য ভ্রূভঙ্গীকৃতমদনকোদণ্ডকদনম্।
নিধাস্যন্তী কণ্ঠে তব নিজভুজাবল্লরিমসৌ, ধরণ্যামুন্মীলজ্জড়িমনিবিড়াঙ্গী বিলুঠতি॥

৮৫। কদাচিন্মূঢেয়ং নিবিড়ভবদীয়-স্মৃতিমদা[১৫],-দমন্দাদাত্মানং কলয়তি ভবন্তং মম সখী।
তথাস্যা রাধায়া বিরহদহনাকল্পিত[১৬]-ধিয়ো, মুরারে! দুঃসাধা ক্ষণমপি ন বাধা বিরমতি॥

৮৬। ত্বয়া সন্তাপানামুপরি পরিমুক্তাপি রভসা,-দিদানীমাপেদে তদপি তব চেষ্টাং প্রিয়সখী[১৭]।
যদেষা কংসারে! ভিদুরহৃদয়ং ত্বামবয়তী, সতীনাং মূর্দ্ধন্যা ভিদুরহৃদয়াভূদনুদিনম্॥

৮৭। সমক্ষং সর্ব্বেষাং নিবসসি[১৮] সমাধিপ্রণয়িনা,-মিতি শ্রুত্বা নূনং গুরুতরসমাধিং কলয়তি।
সদা কংসারাতে! ভজসি যমিনাং নেত্রপদবী,-মিতি ব্যক্তং সজ্জীভবতি যমমালম্বিতুমপি॥

---

১। পরিচিতো (ক); ২। হত কিং (ক), হতকং (ঘ), বত কিং (ঙ); ৩। কর্ণযুগলম্ (গ); ৪। চরণপদ্মেঽপি যদিয়ং (ক, ঘ, ঙ, চ, ছ, ঝ); ৫। শোভাস্পদমিব (ক); ৬। হতাশেয়ং (খ); ৭। বিকসতি (ক); ৮। তব হৃদয়তুল্যং নিজবপুঃ (ঘ, ঙ); ৯। তত্রাভূৎ (ক); ১০। গুরুভিরভিতঃ কীচকরব- (ক, ঘ); ১১। -শ্রবাদস্পন্দায়াং (ক, ঘ); ১২। বিকম্পা (ক), বিজল্পা (ছ); ১৩। বত (ছ); ১৪। শুভহেতুং (ক, ঘ, ঙ, জ); ১৫। -বশাৎ (জ, ঝ); ১৬। বিরহ-কশনাকল্পিত- (ঘ), বিরহদহনাকম্পিত- (ঙ, ছ); ১৭। মম সখী (চ, ছ); ১৮। বিহরসি (ক, ঘ, ঙ, চ, ছ, জ, ঝ)।

৮৮। মুরারে ! কালিন্দীসলিলচলদিন্দীবররুচে ! মুকুন্দ ! শ্রীবৃন্দাবনমদন ! বৃন্দারকমণে !
ব্রজানন্দিন্নন্দীশ্বরদয়িত ! নন্দাত্মজ ! হরে ! সদেতি ক্রন্দন্তী পরিজনশুচং কন্দলয়তি ॥
৮৯। সমন্তাদুত্তপ্তস্তব বিরহদাবাগ্নিশিখয়া, কৃতোদ্বেগঃ পঞ্চাশুগমৃগয়ুবেধব্যতিকরৈঃ।
তনূভূতং সত্ত্ব[১]-স্তনুবনমিদং হাস্যতি হরে ! হঠাদস্য শ্বো বা মম সহচরী-প্রাণহরিণঃ ॥
৯০। পয়োরাশিস্ফীতত্বিষি হিমকরোত্তংসমধুরে ! দধানে দৃগ্ভঙ্গ্যা[২] স্মরবিজয়ি রূপং মম সখী।
হরে ! দত্তস্বান্তা ভবতি তদিমাং কি প্রভবতি, স্মরো হন্তুং কিন্তু ব্যথয়তি ভবানেব কুতুকী ॥
৯১। বিজানীষে[৩] ভাবং পশুপরমণীনাং যদুপতে[৪] ! ন জানীমঃ কস্মাত্তদপি বত মায়াং রচয়সি[৫]।
সমন্তাদধ্যাত্মং যদিহ পবনব্যাধিরলপ,-দ্বলাদস্যাস্তেন ব্যসনকুলমেব দ্বিগুণিতম্ ॥
৯২। গুরোরন্তেবাসী স ভজতি যদূনাং সচিবতাং, সখী কালিন্দীয়ং কিল ভবতি কালস্য ভগিনী।
ভবেদন্যঃ কো বা নরপতিপুরে মৎপরিচিতো, দশামস্যাঃ শংসন্ যদুতিলক ! যস্ত্বামনুনয়েৎ ?
৯৩। বিশীর্ণাঙ্গীমন্তর্ব্রণ[৬]-বিলুঠনাদুৎকলিকয়া, পরীতাং ভূয়স্যা[৭] সততমপরাগ-ব্যতিকরাম্।
পরিধ্বস্তামোদাং বিরমিতসমস্তালিকুতুকাং, বিধো ! পাদস্পর্শাদপি সুখয় রাধা-কুমুদিনীম্ ॥
৯৪। বিপত্তিভ্যঃ প্রাণান্ কথমপি ভবৎসঙ্গমসুখ,-স্পৃহাধীনা শৌরে ! মম সহচরী রক্ষিতবতী।
অতিক্রান্তে সম্প্রত্যবধিদিবসে জীবনবিধৌ, হতাশা নিঃশঙ্কং বিতরতি দৃশৌ চূত-মুকুলে ॥
৯৫। প্রতীকারারম্ভশ্লথমতিভিরুদ্যৎপরিণতে[৮],-র্বিমুক্তায়া ব্যক্তস্মরকদনভাজঃ পরিজনৈঃ।
অমুঞ্চন্তী সঙ্গং কুবলয়দৃশঃ কেবলমসৌ, বলাদস্য প্রাণানবতি ভবদাশা-সহচরী ॥
৯৬। অয়ে রাসক্রীড়ারসিক ! মম সখ্যাং নবনবা, পুরা বদ্ধা যেন প্রণয়লহরী হন্ত গহনা।
স চেন্মুক্তাপেক্ষস্ত্বমসি[৯] ধিগিমাং তুলশকলং, যদেতস্যা নাসানিহিতমিদমদ্যাপি চলতি ॥
৯৭। মুকুন্দ ! ভ্রান্তাক্ষী কিমপি যদসংকল্পিতশতং, বিধত্তে তদ্বক্তুং জগতি মনুজঃ কঃ প্রভবতি ?
কদাচিৎ কল্যাণী বিলপতি যদুৎকণ্ঠিতমতি,-স্তদাখ্যামি স্বামিন্ ! গময় মকরোত্তংস-সবিধম্[১০] ॥
৯৮। অভূৎ কোঽপি প্রেমা ময়ি মুররিপোর্যঃ সখি ! পুরা, পরাং[১১] ধর্ম্মাপেক্ষামপি তদবলম্বাদলঘয়ম্।
তথেদানীং হা ধিক্ সমজনি তটস্থঃ স্ফুটমহং[১২], ভজে লজ্জাং যেন ক্ষণমিহ পুনর্জীবিতুমপি ॥
৯৯। গরীয়ান্ মে প্রেমা ত্বয়ি পরমিতি স্নেহলঘুতা[১৩], ন জীবিষ্যামীতি প্রণয়গরিমাখ্যাপনবিধিঃ।
কথং নায়াসীতি স্মরণ[১৪]-পরিপাটীপ্রকটনং, হরৌ সন্দেশায় প্রিয়সখি ! ন মে বাগবসরঃ ॥
১০০। অমী কুঞ্জাঃ পূর্ব্বং মম ন[১৫] দধিরে কামপি মুদং, দ্রুমালীয়ং চেতঃ সখি ! ন কতিশো নন্দিতবতী ?
ইদানীং পশ্যৈতে যুগপদুপতাপং বিদধতে, প্রভৌ মুক্তাপেক্ষে ভজতি[১৬] ন হি কো বা বিমুখতাম্ ?
১০১। যযৌ কালঃ কল্যাণ্যবকলিতকেলীপরিমলাং[১৭], বিলাসার্থী[১৮] যস্মিন্নচলকুহরে লীনবপুষম্।
স মাং ধৃত্বা ধূর্ত্তঃ কৃতকপটরোষাং সখি ! হঠা,-দকার্ষীদাকর্ষন্নুরসি শশিলেখাশতবৃতাম্ ॥
১০২। কদা প্রেমোন্মীলন্মদনমদিরাক্ষীসমুদয়ং[১৯], বলাদাকর্ষন্তং মধুরমুরলীকাকলিকয়া।
মুহুর্ভ্রাম্যচ্চিল্লীচুলুকিতকুলস্ত্রীব্রতমহং, বিলোকিষ্যে লীলামদ[২০]-মিলদপাঙ্গী মুরভিদম্ ?

---

১। মন্দ- (জ) ; ২। ভ্রূভঙ্গ্যা (ছ) ; ৩। ন জানীষে (ক) ; ৪। যদুমণে (ক চ, ছ, জ, ঝ) ; ৫। তব মায়া রচয়তি (ক, জ) ; ৬। অন্তর্বন- (ক, ঘ, ঙ, ছ, জ) ; ৭। পরাভূতাং ভূয়ঃ (ছ) ; ৮। -পরিণতৈ- (গ) ; ৯। ত্বমপি (ক) ; ১০। -পদবীং (ক) ; ১১। পরাদ্ (গ) ; ১২। স্ফুটমসৌ (ঘ, ঙ) ; ১৩। প্রেমলঘুতা (ঝ) ; ১৪। স্ববশ- (ঘ, ঙ) ; ১৫। অমল (ক) ; ১৬। ব্রজতি (চ) ; ১৭। কল্যাণ্যধিকলিতকেলীপরিমলো (ছ) ; ১৮। বিলাসার্থং (ছ) ; ১৯। কদা প্রেমোন্মীলৎ-পুলকবিপুলাঙ্গী মৃগদৃশে (ঘ, ঙ) ; ২০। লীলাভর- (ঘ)।

১০৩। রণদ্‌ভৃঙ্গশ্রেণীসুহৃদি শরদারম্ভমধুরে, বনান্তে চান্দ্রীভিঃ কিরণলহরীভির্ধবলিতে।
কদা প্রেমোদ্দণ্ড-স্মরকলহ-বৈতণ্ডিকমহং, করিষ্যে গোবিন্দং নিবিড়-ভুজবন্ধপ্রণয়িনম্?

১০৪। মনো মে হা কষ্টং জ্বলতি কিমহং হন্ত করবৈ, ন পারং নাবারং সুমুখি[১]! কলয়াম্যস্য জলধেঃ।
ইয়ং[২] বন্দে মূর্দ্ধ্না সপদি তমুপায়ং কথয়[৩] মে, পরামৃশ্যে যস্মাদ্ধৃতিকণিকয়াপি ক্ষণিকয়া॥

১০৫। প্রযাতো মাং হিত্বা যদি কঠিন[৪]-চূড়ামণিরসৌ, প্রযাতু স্বচ্ছন্দং মম সময়ধর্ম্মঃ কিল গতিঃ।
ইদং সোঢ়ুং কা বা প্রভবতি যতঃ স্বপ্নকপটা,-দিহায়াতো বৃন্দাবন-ভুবি বলান্মাং রময়তি?

১০৬। অনৌচিত্যং তস্য ব্যথয়তি মনো হন্ত মথুরাং, ত্বমাসাদ্য স্বৈরং চপল-হৃদয়ং বারয়[৫] হরিম্।
সখি! স্বপ্নারম্ভে পুনরপি যথা বিভ্রম-মদা,-দিহায়াতো ধূর্ত্তঃ ক্ষপয়তি ন মে কিঙ্কিণি-গুণম্॥

১০৭। অয়ি স্বপ্নো দূরে বিরমতু[৬] সমক্ষং শৃণু হঠা,-দবিশ্রব্ধা[৭] মা ভূরিহ সখি! মনোবিভ্রমধিয়া।
বয়স্যস্তে গোবর্দ্ধনবিপিনমাসাদ্য কুতুকা,-দকাণ্ডে যদ্ভূয়ঃ স্মরকলহপাণ্ডিত্যমতনোৎ[৮]॥

১০৮। অমর্ষাদ্ধাবন্তীং গহনকুহরে সূচিতপথাং, তুলাকোটিক্বাণৈশ্চকিতপদপাতদ্বিগুণিতৈঃ।
দিধীর্ষন্ মাং হর্ষোত্তরল-নয়নান্তঃ স কুতুকী, ন বংশীমজ্ঞাসীদ্ভুবি করসরোজাদ্বিগলিতাম্॥

১০৯। অশক্তাং গন্তব্যে কলিত-নবচেলাঞ্চলতয়া, লতালীভিঃ পুষ্পস্মিতশবলিতাভির্বিরুদতীম্।
পরীহাসারম্ভী প্রিয়সখি! সমালম্বিতমুখীং! প্রপেদে চুম্বায় স্ফুরদধরবিম্বস্তব সখা॥

১১০। ততোঽহং ধম্মিল্লে স্থগিত-মুরলীকা সখি! শনৈ,-রলীকামর্ষেণ ভ্রমদবিরল-ভ্রূরুদচলম্।
কচাকৃষ্টি-ক্রীড়াক্রম-পরিচিতে চৌর্য্যচরিতে[৯], হরির্লব্ধোপাধিঃ প্রসভমনয়ন্মাং গিরিদরীম্॥

১১১। কদাচিদ্বাসন্তী-কুহরভুবি ধৃষ্টঃ সরভসং, হসন্ পৃষ্ঠালম্বী স্থগয়তি করাভ্যাং মম দৃশৌ।
দিধীর্ষৌ জাতের্ষ্যং ময়ি সখি! তদীয়াঙ্গুলিশিখাং, ন জানে কুত্রায়ং ব্রজতি কিতবানাং কুলগুরুঃ॥

১১২। অতীতেয়ং বার্ত্তা বিরমতু পুরঃ পশ্য সরলে! বয়স্যস্তে সোঽয়ং স্মিতমধুরিমোন্মৃষ্টবদনঃ।
ভুজস্তম্ভোল্লাসাদভিমত-পরীরম্ভরভসঃ, স্মরক্রীড়াসিন্ধুঃ ক্ষিপতি ময়ি বন্ধুককুসুমম্॥

১১৩। তদুত্তিষ্ঠ ব্রীড়াবতি! নিবিড়মুক্তালতিকয়া, বধানৈনং ধূর্ত্তং সখি! মধুপুরীং যাতি ন যথা।
ইতি প্রেমোন্মীলদ্ভবদনুভবারূঢ়জড়িমা, সখীনামাক্রন্দং ন কিল কতিশঃ কন্দলয়তি[১০]?

১১৪। অহো কষ্টং বাল্যাদহমিহ সখীং দুষ্টহৃদয়া! মুহুর্মানগ্রন্থিং সহজ-সরলাং গ্রাহিতবতী।
তদারম্ভাদ্গোপীগণরতিগুরো! নির্ভরমসৌ, ন লেভে লুব্ধাপি ত্বদমলভুজ-স্তম্ভ-রভসম্॥

১১৫। অলিন্দে কালিন্দী-কমলসুরভৌ কুঞ্জবসতে,-র্বসন্তীং বাসন্তী-নবপরিমলোদ্গারি-চিকুরাম্।
ত্বদুৎসঙ্গে নিদ্রাসুখমুকুলিতাক্ষীং[১১] পুনরিমাং, কদাহং সেবিষ্যে কিশলয়-কলাপ-ব্যজনিনী?

১১৬। ধৃতানন্দাং বৃন্দাবন-পরিসরে শারদ-নিশা,-বিলাসোল্লাসেন শ্লথিত[১২]-কবরীভ্রষ্ট[১৩]-কুসুমাম্।
তব স্কন্ধোপান্তে বিনিহিতভুজাং গোপরমণীং[১৪], কদা কুঞ্জে লীনা রহসি বিহসিষ্যামি সুমুখীম্?

১১৭। বিদূরাদাহর্ত্তুং কুসুমমুপযামি ত্বমধুনা, পুরস্তীরে তীরে কলয় তুলসী[১৫]-পল্লবমিদম্।
ইতি ব্যাজাদেনাং বিদিতভবদীয়স্থিতিরহং, কদা কুঞ্জে গোপীরমণ! গময়িষ্যামি[১৬] সময়ে?

---

১। কিমপি (গ); ২। অহং (চ, ছ, জ); ৩। রচয় (জ); ৪। বিবুধ- (গ, ঝ); ৫। ধারয় (গ);
৬। নিবসতু (গ, ঝ); ৭। অবিশ্বস্তা (গ, ঝ); ৮। অকরোৎ (গ, ঘ, চ, ছ, জ); ৯। -রচিতে (ঝ);
১০। তুণ্ডিলয়তি (ঘ); ১১। ত্বদুৎসঙ্গে লীলাং মদমুকুলিতাক্ষীং (গ, ঘ, ঙ, ছ, জ); ১২। গ্লপিত- (ঘ, ঝ);
১৩। -ফুল্ল- (ঝ); ১৪। বল্লবীমহং (ঝ); ১৫। লবলী- (ঝ); ১৬। রময়িষ্যামি (গ)।

১১৮। ইতি শ্রীকংসারেঃ পদকমলয়োর্গোকুলকথাং, নিবেদ্য প্রত্যেকং ভজ পরিজনেষু প্রণয়িতাম্।
নিজাঙ্গে কাদম্বীসহচর! বহন্ মণ্ডনতয়া, স যাত্যুচ্চৈঃ[১] প্রেমপ্রবণমনুজগ্রাহ ভগবান্॥

১১৯। মিলদ্ভৃঙ্গীং হংসীরমণ! বনমালাং প্রথমতো, মুদা ক্ষেমং পৃচ্ছন্নিদমুপহরেথা মম বচঃ।
চিরং কংসারাতেরুরসি সহবাসপ্রণয়িনীং, কিমেনামেণাক্ষীং[২] গুণবতি! বিসম্মার ভবতী?

১২০। ইদং কিংবা হন্ত স্মরসি রসিকে! খঞ্জন-রুষা, পরীতাঙ্গী গোবর্দ্ধনগিরি-নিতম্বে মম সখী।
ভিয়া সম্ভ্রান্তাক্ষং যদিহ বিচকর্ষ ত্বয়ি বলাদ্,-গৃহীত্বা বিভ্রশ্যন্নবশিখিশিখং গোকুলপতিম্?

১২১। ততঃ সম্ভাষেথাঃ শ্রুতিমকরমুদ্রামিতি মুদা, ভবত্যাং কর্ত্তব্যঃ কিমিতি কুশলপ্রশ্ন-জড়িমা।
রুচিস্মেরা যা ত্বং রচয়সি বলাচ্চুম্বনকলা,-মপাঙ্গেন স্পৃষ্টা সখি! মুররিপোর্গণ্ডমুকুরে[৩]॥

১২২। নিবাসস্তে দেবি! শ্রবণলতিকায়ামিতি ধিয়া, প্রযত্নাত্ত্বামেব প্রণয়[৪]-হৃদয়া যামি শরণম্।
পরোক্ষং বৃষ্ণীনাং নিভৃত-নিভৃতং কর্ণকুহরে, হরেঃ কাকুমিশ্রাং কথয় সখি! রাধা-বিধুরতাম্॥

১২৩। পরীরম্ভং প্রেম্ণা মম সবিনয়ং কৌস্তুভমণৌ, ব্রুবাণঃ কুর্ব্বীথাঃ পতগবর! বিজ্ঞাপনমিদম্।
অগাধা রাধায়ামপি তব সখে! বিস্মৃতিরভূৎ, কথং বা কল্যাণং বহতি তরলে হি প্রণয়িতা?

১২৪ মুহুঃ কুর্ব্বৎকাঞ্চীমণিবলয়মঞ্জীরমুরলী,-রবালম্বী ভ্রাম্যদ্যুবতিকলগীতৈঃ সুরমণে[৫]!
স কিং সাক্ষাদ্ভাবী পুনরপি হরেস্তাণ্ডবরসৈ,-রমন্দঃ কালিন্দীপুলিনভুবি তৌর্য্যত্রিকভরঃ?

১২৫। নবীনস্ত্বং কম্বো! পশুপরমণীভিঃ পরিচয়ং, ন ধৎসে রাধায়া গুণগরিমগন্ধেঽপি ন কৃতী।
তথাপি ত্বাং যাচে হৃদয়নিহিতং দোহদমহং, বহন্তে হি ক্লান্তে প্রণয়মবদাত-প্রকৃতয়ঃ॥

১২৬। গৃহীত্বা গোবিন্দং জলধিহৃদয়ানন্দন! সখে! সুখেন শ্রীবৃন্দাবন-পরিসরে নন্দতু ভবান্।
কথং বা তে গোষ্ঠং ভবতু দয়িতং হন্ত বলবান্, যদেতস্মিন্ বেণোর্জয়তি চিরসৌভাগ্য-মহিমা?

১২৭। ইতি প্রেমোদ্গার-প্রভবমনুনীয়[৬] ক্রমবশাৎ, পরীবারান্ ভ্রাতর্নিশময়তি চাণূরমথনে[৭]।
পুনঃ কোপোদ্ভিন্ন[৮]-প্রণয়চটুলং তস্য নিকটে, কথামাচক্ষীথা দশভিরবতারৈর্বিলসিতাম্॥

১২৮। গ্রহীতুং ত্বাং প্রেমামিষ-পরিবৃতং চিত্তবড়িশং, মহামীনং ক্ষিপ্রং ন্যধীত রসপূরে মম সখী।
বিবেকাখ্যং ছিত্ত্বা গুণমথ তদগ্রাসি ভবতা, হতাশেয়ং কিংবা শিব শিব বিধাতুং প্রভবতি?

১২৯। বরাকীয়ং দৃষ্ট্বা সুভগ! বপুষো বিভ্রমভরং, তবাভ্যর্ণং ভেজে পরমকুতুকোল্লাসিতমতিঃ।
তিরোধায় স্বাঙ্গং প্রকটয়সি যত্ত্বং কঠিনতাং, তদেতৎ কিং ন স্যাত্তব কমঠ-মূর্ত্তেঃ[৯] সমুচিতম্?

১৩০। যদা কংসারাতে! স্ফুরতি চিরমদ্যাপি ভবতঃ, স্ফুটং ক্রোড়াকারে বপুষি নিবিড়-প্রেমলহরী।
অতঃ সা সৈরিন্ধ্রী মলয়রুহ-পঙ্কপ্রণয়িনী, ত্বয়া ক্রোড়ীচক্রে পরমরভসাদাত্মদয়িতা॥

১৩১। চিরাদন্তর্ভূতা নরহরিময়ী মূর্ত্তিরভিত,-স্তদীয়ো ব্যাপারস্তব হি ন যযৌ বিস্মৃতিপথম্।
বিনীত-প্রহ্লাদস্ত্বমিহ পরমক্রূরচরিত,-প্রযুক্তো[১০] যদ্ভূয়ঃ পরহৃদয়ভেদং জনয়সি॥

১৩২। যদাত্মানং দর্পাদগণিতগুরুর্বামন! মুদা, মনোবাঞ্ছে[১১] নাট্যং ত্বয়ি বলিতয়া কল্পিতবতী।
প্রপেদে তস্যেদং ফলমুচিতমেব প্রিয়সখী, বিদূরে যৎ ক্ষিপ্তা ব্যসনকুল[১২]-পাশৈর্নিগড়িতা॥

---

১। স যাত্যুচ্চৈঃ (ঘ, ঙ), স মামুচ্চৈঃ (ছ, জ); ২। কিমেণাক্ষীং গোপীং (ছ); ৩। গণ্ডকুহরে (খ); ৪। প্রবণ- (ঝ); ৫। -যুবতিকলগীতঃ সরমণঃ (ছ); ৬। -প্রবণমনুনীয় (ঘ, ঙ); ৭। -দমনে (ঘ, ঙ); ৮ প্রেমোদ্ভিন্ন- (ঝ); ৯। কঠিনমূর্ত্তেঃ (ঝ); ১০। -প্রসক্তো (চ, ছ জ); ১১। মনোরাজ্যে (ঘ, চ, ছ); ১২। ব্যসনময়- (ছ)।

১৩৩। ইয়ং নাথ! ক্রূরা ভৃগুপতনমাকাঙ্ক্ষতি ততো, যদস্যাং কাঠিন্যং তব সমুচিতং তদ্ভৃগুপতেঃ।
ইয়ং তে দুর্ব্বোধা কৃতিরথ ভবদ্বিস্মৃতিপথং, যতো জাতঃ সাক্ষাদ্গুরুরপি স নন্দীশ্বরপতিঃ॥

১৩৪। নিরানন্দা গাবশ্চিরমুপহতা দূষণকুলৈঃ, খরায়ন্তে সন্তো রঘুতিলক! গোবর্দ্ধন-তটাঃ।
বিরাধত্বং ঘোষো ব্রজতি ভবদীয়-প্রবসনা,-দিদানীং মারী চ স্ফুটমিহ নরীনর্ত্তি পরিতঃ॥

১৩৫। প্রপন্নঃ কালোঽয়ং পুনরুদয়িতুং রাস-ভজনৈ,-র্বিলাসিন্যস্তাপি স্ফুটমনপরাধা বয়মপি।
বিতন্বানঃ কান্তিং বপুষি শরদাকাশ-বনিতাং, কথং ন ত্বং সীরধ্বজ! ভজসি বৃন্দাবনমিদম্?

১৩৬। ন রাগং সর্ব্বজ্ঞ! ক্বচিদপি বিধত্তে রতিপতিং[1], মুহুর্দ্বেষ্টি দ্রোহং কলয়তি বলাদিষ্ট-বিধয়ে[2]।
চিরং ধ্যানাসক্তা নিবসতি সদাসৌ গতরতি,-স্তথাপ্যস্যাং হংহো সদয়হৃদয়স্ত্বং ন দয়সে॥

১৩৭। পরিক্লেশ-ম্লেচ্ছান্ সমদমধুপালী-মধুরয়া, নিকৃন্তন্ নেত্রান্ত-প্রণয়রচনা-খড়্গ-লতয়া।
ত্বমাসন্নঃ কল্কিস্ত্বিহ চতুরগোপাহিতরুচিঃ, স্বদেশং কুর্ব্বীথাঃ পরিমুদিতধীরাধিকমিদম্[3]॥

১৩৮। ইতি প্রেমোদ্গাঢ়[4]-স্ফুটিত-বচোভঙ্গিরখিলং, ত্বমাবেদ্য[5] ক্লিশ্যন্মুখপরিসরো লোচনজলৈঃ।
ততো গোবিন্দস্য প্রতিচরণ[6]-মাধ্বীকপদবী,-মুপাসীনো দৃগ্ভ্যাং ক্ষণমবদধীথাঃ খগপতে!

১৩৯। প্রণেতব্যো দৃষ্টৈরনুভবপথং নন্দতনয়ো, বিধেয়া গোপীনাং স্মরপরিবৃতানামুপকৃতিঃ[7]।
ইয়ং যামৈর্গম্যা চতুর! মথুরাপি ত্রিচতুরৈ,-রিতি দ্বৈধং নান্তঃ কলয় কলহংসী-কুলপতে!

১৪০। অপূর্ব্বা যস্যান্তর্বিলসতি মুদা[8] সারস-রুচি,-র্বিবেক্তুং শক্যেতে সপদি মিলিতে যেন পয়সী।
কথঙ্কারং যুক্তো ভবতু ভবতস্তস্য কৃতিনো, বিলম্বঃ কাদম্বীরমণ! মথুরাসঙ্গমবিধৌ?

১৪১। প্রপন্নঃ প্রেমাণং ভগবতি সদা ভাগবতভাক্, পরাচীনো জন্মাবধি ভবরসাদ্ভক্তিমধুরঃ।
চিরং কোঽপি শ্রীমান্ জয়তি বিদিতঃ সাকরতয়া, ধুরীণো ধীরাণামধি[9]-ধরণি বৈয়াসকিরিব॥

১৪২। রসানামাধারৈরপরিচিতদোষঃ সহৃদয়ৈ,-র্মুরারাতেঃ ক্রীড়াবলি-নিবিড়রূপার্পিতগুণঃ[10]।
প্রবন্ধোঽয়ং বন্ধোরখিলজগতাং তস্য সরসাং[11], প্রভোরন্তঃ সান্দ্রাং প্রমদলহরীং পল্লবয়তু॥

ইতি শ্রীশ্রীল-রূপগোস্বামি-প্রভুপাদ-বিরচিতং হংসদূতাখ্যং কাব্যং সমাপ্তম্।

---

विक्रेय नहीं है

## পরিশিষ্টম্

একোনসপ্ততিতমাৎ পরমধিকঃ শ্লোকঃ ক্বচিৎ —

যদাস্থায়ি ভ্রাতর্ব্রজবরবধূকেলিসুহৃদা
তদারণ্যং ঘোরং যদপি নবসৌধং ব্যজয়ত।
তদেবাস্তাং তাবদ্গতবতি মুরারৌ মধুপুরীং
স্বকীয়াগারং লো গিলিতুমভিধাবত্যবিরতম্॥

---

১। নরপতিং (গ); ২। -বিষয়ে (ছ); ৩। প্রতিমুদিতমারাধিতমিমাঃ (ঘ, চ); ৪। প্রেমোদ্ঘাট- (ঝ)
৫। সমাবেদ্য (ছ); ৬। প্রতিবচন- (চ, ছ, জ, ঝ); ৭। ভুবনমহিতানামুপকৃতিঃ (ঘ, ঙ, চ, ছ, জ); ৮। সদা
(ছ, জ); ৯। বীরাণামধি- (খ, গ, ঘ, ঙ, চ); ১০। মুরারাতি-ক্রীড়ানিবিড়-ঘটনারূপসহিতঃ (খ, গ);
১১। জগতামস্য সহসা (ঘ, ঙ, ছ, জ, ঝ)।